चमः।पशुकामस्यविश्वजिदतिरात्रोनामषष्ठः।ब्रह्मवर्चसकामस्यत्रिवृदतिरात्रोनामसप्तमः।वीर्य
कामस्यपंचदशातिरात्रोनामाष्टमः।अन्नाद्यकामस्यसप्तदशातिरात्रोनामनवमः।प्रतिष्ठाका
मस्यएकविंशातिरात्रोनामदशमः।अप्तोर्यामातिरात्रोनामैकादशः।अभिजिदतिरात्रोनामद्वा
त्व्यवतोद्वादशः।सर्वस्तोमातिरात्रोनामनुमूपतस्त्रयोदशइतित्रयोदशातिरात्रावेक्ष्यमाणस्त्रये २८

दशातिरात्राइत्युपक्रम्यतेषांचत्वारिंऽषोडशिकाःप्रथमाइतिसूत्रेणचतुर्ष्वेवव्यवस्थितःषोडशिनिषेधः
कृतइतिनिमित्तात्तव्यवस्थितोनिषेधोयथास्मार्तकर्मपरित्यागोराहोरन्यात्रसूतकइतिराहोःसहस्रसूत
कादन्यत्रान्यसूतकेस्मार्तकर्मपरित्यागइत्यर्थोऽश्रपणात्नचस्वार्थेतरंपूर्वमुक्तं।सत्यंतथापर्यहृदय
बाधकस्मृत्यंतरगतवाक्यहपर्वलेननतात्पर्यग्रहादस्योभयार्थत्वाविरोधाद्द्वमाद्विणातथाव्यारभ्यातेस
स्कार्यंतोव्यवस्थितोनिषेधोयथा।अश्वलायनसूत्रेहोमद्वेमेषुपरिस्तरणेतिसर्वत्रपरिस्तरणंविधाय
कृतात्तमाज्यहोमेषुपरिस्तरणमित्यकृतशब्देननिषेधान्यवव्यवस्थयोक्तः।कलंतोव्यवस्थितोनिषेधो
यथा।ब्राह्मणायावगुरेत्तंशतेनयातयाघोनिहनत्सहस्रेणयोलोहितंकरवधावतःप्रस्कंद्यपांसून्सं
गृह्णात्तावतःसंवत्सरान्सुवर्गंलोकंनप्रजानायात्तस्माद्ब्राह्मणायावगुरेतलोहितंकुर्यादितिनिषे
धफलान्येवहिनिषेधफलानितेषुचात्रनिषेधाव्यवस्थिताःषड्विधोपिचायंसामान्यादिनिषेधः।श्रौत
स्मार्ताद्विभेदेनप्रत्यक्षकल्प्यभेदभिन्नतत्त्वास्माभिर्यथासंभवंश्रौतस्मार्तोदाहरणान्युक्तानितथाच
कल्पार्थेषुरूपार्थभेदयोरपिसामान्यादिषड्विनिषेधेषुसंभवायथासंभवंकल्पार्थेषुरूपार्थोदाहरणं

२९ न्यप्यस्माभिः कश्चिद्धर्मानि विदुक्तानि इतरारायपि मृण्मयाणि वापि श्रौतः स्मार्तो वा कर्त्तव्यत्वे क्रियायाः प्रति
षेध इति प्रतिषेधभेदाः पूर्वमुक्ताः सोपि कर्त्तव्यत्वे क्रियाणां षोडशविधत्वात्षोडशविधः। तथाहि प्रकृतौ
क्रियतौ अप्रकृतौ विकृत्यात्मके च कर्मणि समानविधानो निषेधो यथास्तद्धानीतेः कृयकातेः कर्म
कुर्वंन्यतत्सय इति विकृत्यात्मके च कर्मणि सर्वत्रोपदिष्टकर्मेषु निदितः। आरादुपाकारकक्रियाः
निषेधः संनिपत्योपकारकक्रियानिषेधश्च। तत्राद्यस्त्रिविधः प्रकृतिगतो विकृतिगतः सर्वकर्मगत
य श्च। तत्राद्यो यथा न श्वश्च मंत्रे प्रवृंज्यादिति विकृगतो पि हि विद्यातिदिष्टविषय उपदिष्टविषयश्च। आद्ये
यथा नतोपपौकेरातात्यज्यमाग निषेधः। द्वितीयपदिष्टारादुपकारकविषयो निषेधो यथा। कालाप
सूत्रे ग्राघेभीपपत्नीः स्वाहा देवेभ्य देवेभ्यः स्वाहा इति मंत्राभ्यां परिपशव्य आज्ञतीः आरादुपकारकेकस
त्रापन एवोपरकालेच्छा विषापनं वेतञ्जुहोतीति निषिद्धः। अपूर्वकर्मण्युपदिष्टारादुपकारकक्रिया नि
षेधो यथा दाशमिकः अग्न्याधेये वावंतीयादि सामगानं निषिध्यते न ब्रह्मसाम्यामान्यीगायेतिती। अब्रा
ह्मणः सामगानस्याप्राप्तेरनुवादमात्रत्वात्सामगाना निषेधाद्विसंसामगानमित्याशंक्यानुवाद मा २९

न्नास्यातदर्थक्यात्सामगाननिषेधएवापंब्रह्मशब्दस्तुब्राह्मणपरोनुवादइत्युक्तंदशमेसंनिपत्योपका
रकक्रियानिषेधोपित्रिविधः प्रकृतिगतोविकृतिगतोप्रकृतिविकृत्यात्मककर्मगतश्च।तत्रप्रकृ
तिगतसंनिपातिक्रियानिषेधोपिद्विविधः अदृष्टार्थेविषयोदृष्टार्थविषयश्च।दृष्टार्थविषयोपिद्वि
विधःप्रतिपत्तिभिन्नद्रव्यसंस्कारविषयः प्रतिपत्तिविषयश्च।एवमेवापूर्वकर्मगतोपित्रिविधः
विकृतिगतोप्येवमेवत्रिविधःसतुत्रिविधोपिविकृतिगतोनिषेधःपुनर्द्विविधःउपदिष्टविषयो
तिदिष्टविषयश्च।तदेवंद्वादशनिषेधभेदाःसिद्धाः।तेषांद्वादशानामुदाहरणानिद्वादशोच्यंते
तितत्रप्रकृतिगतसंनिपात्यदृष्टार्थक्रियानिषेधोयथामधुपर्केचसोमेचअप्सुप्राणाहुतीषुचनो
च्छिष्टोभवतिद्विजइतिसोमेपुरस्तुध्यर्थेनादृष्टार्थस्यसंनिपातिनआचमनस्यनिषेधः।प्रकृतिगत
प्रतिपत्तिव्यतिरिक्तादृष्टार्थसंनिपातिक्रियानिषेधोयथाअग्निहोत्रहोमेद्रुतेप्रिमुपतिष्ठत
इतिविधायतस्मान्नोपतिष्ठेतेतिप्रातपयेदृष्टार्थोग्निसंस्कारकसंनिपात्युपस्थाननिषेधः॥

३० प्रकृतिगतप्रतिपत्तिनिषेधो यथा। अग्निहोत्रहवण्याश्चठेहइतिकाले निषेधः। अप्रकृतिविकृत्या
30 त्मककर्मगतसंनिपात्यदृष्टार्थक्रियानिषेधो यथा कांतिपेत्सतु न तत्र संभारसामवपनं चालुः
प्राण्यजागरणइध्माबर्हिर्बोधांचारणसार्प राज्ञीनं वाकुर्यादिति वपननिषेध आधाने। अप्रकृति
विकृत्यात्मककर्मगतप्रतिपत्तिव्यतिरिक्तदृष्टार्थसंनिपातीक्रियानिषेधो यथा नंतरो राज्ञाकांति
पसत्रगत एव राज्ञो पदार्थैर्त्तृणार्थत्वेन दृष्टार्थस्य संनिपातिनो जागरणस्य निषेधः। अप्रकृतिविकृ
त्यात्मककर्मगतप्रतिपत्तिनिषेधो यथा। आहिताग्निमग्निभिर्दहंतीति पंचपात्रैश्चेत्याधानकर्तृसंस्का
रस्तच्छरीरप्रतिपत्तिरूपो विहितस्तस्यात्महनने निषेधो मृ विष्याग्निरोम्यच्छ्यामरणं विप्रादित्यादि
नात्मघात्यादीनुक्त्वा न तेषां स्यात्संस्कार इति संस्कारशब्दे नेहाग्निनिषिद्धः। विकृतिगतोपदिष्टा
र्थसंनिपातिक्रियानिषेधो यथाति रात्रे षोडशिग्रहनिषेधः पशुसामाधिकरणे क्रमसमुच्चयपद
श्लोपपद्ये ग्रहणानामदृष्टार्थतोक्तः। तथा प्लुतपद्येप्रीषोमीयपशौ तदाकुर्नोपाकुर्यान्माग्निं मंथे। ३०

दित्युपाकरणनिषेधः। तथा कल्पसूत्राधिकरणे अन्यार्थैर्ब्राह्मणैश्चान्याङ्गापधंत्यपैर्निर्णयानिति च
र्तिकव्याख्याने न्यायसुधाकृतोक्तं प्राश्य घृतं गं सेध यथाह वाङ्मदं मनो वरस्थाव क्तो वर्तते एवं हे वाक्तोव
र्तत इति घृतप्राशनविधिशेषभूतब्राह्मणज्ञाभिपत आचमननिषेध आश्वलायनसूत्रेना चामेद्धि
ज्ञापते दे चरथ्यावा एष पद्धातानाद्यमद्भिः करवाणीति सायं निषेध आचांतेन कर्तव्यमित्यनेन क्रुत्ता
दिनिमित्तकस्यैवाहिष्टनिमित्तकस्यापि विहितस्यास च विधिरतिदिष्टव्यपांगेषु शस्त्रादिषनुपदेश
त एव प्रवर्तते न ह्विरुक्तान्यायादतिदेशतः कर्तव्यत्वेनोद्दिष्टाचमनविधातकर्तव्यतापाश्वातिदि
ष्टद्वय्योपदेशिकत्वात। अत्यथा चैक एवाचमनस्वविधिर्विकृतौ प्रधानांशे औपदेशिको गांशे त्वाति
देशिक इति वैरूप्यमापद्येतेति विकृतिगतदृष्टार्थप्रतिपत्तिव्यतिरिक्तसंनिपातिक्रियानिषेधोपप्रा
शातपथीयः पूर्वोक्तोग्नीषोमीयपशौ विहितस्याग्निमथनस्य निषेधो नाग्निं मंथेदिति। विकृतिगतो
पदिष्टप्रतिपत्तिनिषेधावथाभागावदाननिक्तो मंत्रब्राह्मणप्रोहिं यजमानाययुरीततमध्यपेवइत्या

३१ दानितान्यानारभ्यविहितानि अग्नीषोमापमापातानातिकर्कोक्तेः पुनस्त्वेनोक्तं शाखान्तरे ग्रीष्मामी
31 योऽप्रतिषेधाद्धिकारः पश्चन्तुपगच्छन्तीति तिननिरूढे उपदेशाद्देव प्राप्नोतीति तेषां निरूढ एव निषेधः प्राप्त
पथे क्तो प्रज्ञाहाध्यध्वपुरोततं छेच्छन्निति अत एव तत्र विकल्प इति विकृतिगतातिदिष्टदृष्टार्थसं
सन्निषेधोपपावाजसनेयिमते पूर्णमासविकृतिलेनसंमते सदाचिद्दामरूपेषु पित्र्येयं वकहोमेषु श
तपथेक्ष्वपतेतवा आक्ताः स्युः तस्मादनक्ता एव स्युरिति चेसोपि प्राकृतस्याञ्जनस्य निषेधः॥ अत एव त
न्मूलकं काम्यायमस्त्वं अक्तावेति। अतिदिष्टदृष्टार्थे संनिपातिनिषेधोऽयथा प्रयतिवा एतदचोक्तं स्यु
यदेनं हहतित स्मादचेनो हृदिः पृहनिषेधात्प्राकृतपाज्यानुवावनाद्यङ्ग निषेधः। विकृतिगतातिदिष्ट
प्रतिपत्तिनिषेधोऽयथापि आयां शतपथोतामुपहं यावेवजिघ्रन्तिन प्राश्नन्तीति मध्यस्पेडोपह्वाना नांत
रमवघ्राणं विधाय प्राशनं निषिद्धं। अत एव कर्केणोक्तं न प्राश्नन्तीति प्रतिषिध्य प्रतिप्रसवः प्राशितव्यं त्वे
वचयं मन्यामह इतितीन त्वेतत्सुक्तं न गिराणिरे तिद्धपादितिवन्निषेधानुवादस्यावघ्राणस्य प्राशन स ३१

नापन्नत्वार्थत्वात्॥ निषेधानुवादं विनापि वाक्यान्नापन्नावधारणे प्राशनविधिभ्यामेव विकल्पसिद्धौ नि
षेधवैयर्थ्येन तस्यावधारणयत्नेन त्वादनुवादपात्रत्वात्॥ अतोऽन्यदुदाहरणं मृग्यं न तु यथा सर्वविधि
र्नियमविधिः परिसंख्याविधिरिति विधित्रैविध्यमुक्तमेवमपूर्वो निषेधो नियमरूपो निषेधः परिसंख्या
रूपो निषेध इति निषेधत्रैविध्यं कस्मान्नोक्तं न चोदाहरणासंभवान्नोक्तमिति वाच्यं उदाहरणप्रवृत्तेः
तथाहि। अपूर्वनिषेधोदाहरणं तावन्नातिरात्रे षोडशिनं गृह्णाति रात्रौ तेनं जुहोतीत्यादि। अत्र यद्यपि षो
डशिग्रहणादि स्वरूपं विध्यन्तरेण प्राप्तं तथाप्यनिष्टसाधनत्वमपूर्वं बोध्यत एते ऽपूर्वनिषेधाः स्यु
र्यथाग्निहोत्रे स्यान्न त्रिविधितः स्वरूपप्राप्तावपि तस्येष्टसाधनत्वमपूर्वं बोधयन्नग्निहोत्रं जुहुयात्स्वर्गका
म इति फलविधिरपूर्वविधिरस्तु ति नियमरूपनिषेधोदाहरणं तु। अभिषवणफलके सहत्यश्वं तेन
संत्रयणेति अ संतृणेहि हन्निति। अत्र हि संतर्दनासंतर्दनयोरन्यतरेणाप्यभिषवसिद्धौ राग्वेपतउभ
योः पाक्षिकप्राप्तौ संतर्दनं निषेधो संतर्दनं नियमयंस्तदप्राप्तौ पक्षे एरयन्नियमनिषेधः स्यात परि

३२ संख्यारूपनिषेधोदाहरणं तु वामनपुराणे नंदासु नाभ्यंगमुपाचरेत क्षौरं च रिक्तासु जयासु मांसं पूर्णा
सु योषित्परिवर्जनीया भद्रासु सर्वाणि समारभेतेति सामान्यनिषेधेपि विशेषनिषेधः बृहस्पतिः।
अमावस्या तु संक्रांतिचतुर्दश्यष्टमीषु च। नरश्चंडालयोनौ स्यात्तैलस्त्रीमांससेवनात् इति। तस्मादपू
र्वे निषेधनियमपरिसंख्यारूपनिषेधत्रैविध्यमपि संभवति तत्किमिति नोक्तमिति चेद् उच्यते। प
रिसंख्यासूत्रे सर्वत्र हि परिसंख्याशब्दादेवकाराद्वा विना न स्तुत्या परिसंख्या नियमो वा बोध्यत इति
वार्तिकात् तत्रैव द्वादशे परिसंख्येति कुत्राप्यभावाद् वर्जनं तु द्विः परिसंख्या तद्वाचकः शब्दो न हि जिति
व्यातं न्यायसुधायां ततश्च निवृत्त्यर्थो निषेधः सर्वोपि श्रौतपरिसंख्यात्वेनैवोक्तः एतेन प्रवर्तकस्यार्थवि
धारे वापूर्वविधात्व नियमविधित्वे संमते इति न निषेधस्यापूर्वविध्यादि द्वैत्रयमुक्तमिति। नैवं
मपि निषेधस्य कथं परिसंख्यात्वं तत्र चान्यत्र च प्राप्ते परिसंख्येति कीर्त्यत इति परिसंख्यालक्षणे
परिसंख्याशास्त्रविषयस्य तदविषयस्य च प्राप्तौ तदविषयव्यावर्तकं शास्त्रं परिसंख्येति परिसंख्या ३२

उक्तेणोक्ते निषेधे च स्वविषय एव निषेधस्य व्याहृतैरिति चेत न निषेधस्यापि परिसंख्यात्वप्रति
पादकवार्त्तिकानुरोधे मतत्त्र चेति वार्त्तिकस्यैव तस्मात्पुत्त्रीयते पस्य कस्यापि कथंचित्प्राप्तस्य प्र
स्यमानस्य वाच्यवृत्तिफलत्वं कं पक्षान्तरे सा परिसंख्येति तेन न कोपि दोष इति। विधिः श्रुतिषध्य
पुनः प्रत्येकं पंचविधः लिङ् लोट् तव्य कृत्यार्थ पंचमलकारभेदात्। चंच विधोपि विधिः पुनर्द्वि
विधः श्रौतः स्मार्तश्च एवं निषेधोपि द्विविधः श्रौतः स्मार्तश्च। तत्र श्रौतो लिङ् यथा ज्योतिष्टोमेन स्व
र्गकामो यजेतेति। श्रौतो लोट् यथा एकधास्यात्वचमाच्छ्यतादिति। अपंचमंत्रगतोपि लोट्
विधिरेव एकेन प्रकारेण त्वगाच्छेदस्याप्राप्तेः। श्रौतः कृत्यायथा स्वाध्यायोध्येतव्य इति। यद्यपि
विधेः कृत्यानस्यार्थे तत्पापि प्राप्तविषयप्रवर्तनारूपप्रैषे स्मृतस्य तव्यादेः प्राप्तविषयप्रवर्तन
रूपो विधिर्लेख्यः। तदुक्तं प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्यभिधीयते। अप्राप्तप्रेषणं सर्वविधित्वं प्रतिपद्यते
इति। विधेः कृत्यार्थतव्यप्रत्ययाद्युदाहरणेषु तव्यप्रत्ययो यथा श्रवतैवे श्रोतव्यं। केर अवगाहे। अथ

३३
33

गाहितव्यः। केन्यः शुश्रूषेण्यः शुश्रूषितव्यः। तव्यशाकर्त्वेह च्चिः कर्तव्यः। एवं जातीयकाः स्वियो श्रौतः पंचम
लकारो यथा। समिधाय जंतातृत्यादि। पंचमत्वं च लेटः द्वैधाज्ञेयं। अत्याहारेण ष्वणेकारः षष्ठस्तथा पिल
कारानुबंधकस्य लकारस्याभावाद् जनुबंधकेषु लकारेषु एकारानुबंधकस्य लेटः पंचमत्वे लका
रानुबंधन्नूतेषु द्वारेषु ह्र एकारस्य पंचमत्वात्। यद्वा। धातुसबंधे प्रत्ययाः इति तृतीये धात्वधिकारे वि
पासमभिहारे लोडिति लोट् विहितः। ततश्छंदसि लुङ्लिङ्लिटइति लकारत्रयं विहितं ततो लिङर्थे लेडि
ति लेट् विहितः। अतस्तत्तापधात्वधिकारे लकारचतुष्टयादुत्तरं विहितत्वात्पंचमलकारोयं। ददृष्य वि
धानापेक्षः पूर्णप्रत्ययः अघषष्ठं चिति चित्तु तइत्यत्र तदेतत्पंचमे प्रतिपादितमिति। श्रौतः प्रतिषेधे लि
ङ्यथा न च तु स्त्रिं रातिज्ञ्यादिति। श्रौतः प्रतिषेधे लोट् यथा। मुग्धं। श्रौतः प्रतिषेधे क्तसो यथा। तस्मा
द्वहिषि रजतं न देयमिति। श्रौतः प्रतिषेध पंचमलकारो यथा। न संतरणाविदाति नो न जुहोतीत्यादि। श्रौ
तः प्रतिषेधे तवे प्रत्ययो यथा तस्माद्ब्राह्मणेन नम्लेच्छितवै इति। तदुक्तं व्याकरणाधिकरणन्यायसुधा ३३

यां। एवं केननावगाहेनावगाहितव्यमिति काशिकायां। एवंकेन्यत्वैनो मृग्गेमोऽस्मार्ते। विधौ लिङ् यथा मनः
अग्निहोत्रं जुहुयादाद्यंते ध्रुतिशेषः स्मरेति। स्मार्ते विधौ लोट् यथा। मृग्यं। स्मार्ते विधौ कृत्या यथा चौरत
व्यमतो नित्यं प्रायश्चित्तं विशुद्धये इति। तवैषतयाद्युदाहरणानि स्मृतिषु प्रापानोपलभ्यंते। स्मार्ते वि
धौ पंचमलकारो यथा। मनुः माहायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः। प्राङ्नाभिवर्धनात्पुंसो जातकर्म
विधीयत इति। अत्र कर्तव्या विधातव्यमित्यर्थः। अत्रापि विधौ प्रतिषेधे वा कालत्रयपुरुषार्थभेदसं
भवात्तदुदाहरणान्यविपर्यासंभवं मृग्याणि एवमुत्तत्रापि ज्ञेयं। इति विधिनिषेधभेदाः। इतः परम
भिधात्म्यादयः श्रुतिभेदा उद्दिष्टास्तेषामपि भेदा इदानीमभिधीयंते। अभिधात्री श्रुतिः पंचविधा ध
तुः प्रातिपदिकं कृदादिप्रत्यय उपसर्गो निपातश्चेति। धातुरपि द्विविधः भूवादयो धातव इति विहित
तधात्वसंज्ञः सनाद्यंता धातव इति च। प्रातिपदिकमपि द्विविधं अर्थवदधातुरप्रत्ययः प्रातिपदि
कमिति कृततसंज्ञं कृत्तद्धितसमासाश्चेति वा। प्रत्ययस्तु चतुर्विधः सुप्तिङ्कृत्तद्धितभेदात्। उपसर्ग

३४ तिपातयोस्तु च चकत्वमित्येकः पक्षः न च टीकायां तज्जो निवर्तनावाच्यत्वोक्तेः अप्रसुरासेचनज्ञोल
34 लोक्तेः मुख्याभावे च गाध्यादीनामिवलक्षणात्तुपपत्तेः॥ तेषां द्योतकत्वमित्यपरः पक्षः॥ आह
त्यधिकरणे यदर्थे द्योतकौ तौ तु वाचकः स विलार्थे तद्द्युक्तेः॥ द्योतकत्वपक्षेपि षोत्वस्य तदर्थ
यातु विधानात्तयोर्वाचककल्पनैवेति नश्रुतित्वाविघातः पदस्य धप्रकृतिप्रत्यायार्थयोरन
न्वितयोः राभिधानपक्षेपि विनियोजकश्रुतित्वाविघातः॥ विनियोक्त्र्याश्रुतिस्तु त्रेधा विधिश्रुति
परस्मैपदश्रुतिरात्मनेपदश्रुतिः सुबंततिङन्ताते पेकर्थे द्रूपापापश्लेषफलकेणेति गीवते एकप्रत
यरूपा कारकविभक्तिः उपपदविभक्तिषु तादर्थ्ये चतुर्थी शेषे षष्ठी चेति तत्र विधिश्रुतिर्यथ
यजेतेत्यादौ सा स्वविषयीभूतां भावनामपुरुषार्थरूपया गमुपेक्ष्य पुरुषार्थरूपे स्वर्गादौ भावे
विनियुंक्ते परस्मैपदश्रुतिरूपा श्रुतिस्तु तीपेत था कामार्थसंयोगादित्यधिकरणे सिद्धान्तसाधक
तयोक्ता मिथ्रेः मितुयादि तिपरस्मैपदश्रुत्याधपुंव्यापारः परार्थैः प्रयते तत्पाश्रुत्याविरोधाधी ३४

कामयेतवर्षुकः पर्जन्यः स्यान्नीचैः सदो मिनुयादिति तत्सामानाधिकरण्यं कामयतेर्बोध्यत इति । आत्मने
पदश्रुतिर्यथा दधीतेत्यात्मनेपदश्रुत्याधानस्याध्याप्रिसाध्यकर्मकत्वानामाधात्वर्थता भवति । सुब्धेष
श्रिप्रयोगेषु पुरुषश्रुतेरित्यधिकरणे तंत्ररत्ने न्यायार्थेनाभिसंबध्यत इति सूत्रे । सोर्यादीनां त्वाधानगतेतात्म
नेपदेनाधानकर्तुरेव फलमित्यादिना सुबंतात्मकैकपदरूपा एकप्रत्ययरूपा च विधिनियोक्त्री क्रमेणैव
ध्यवाधकभावेनास्य यथा । तथा पश्वंगमेकत्वं पदश्रुत्या प्रतीयते । समानप्रत्ययश्रुत्या वल्लीयस्या क्रियं
गतेति । तिङंतात्मकैकपदरूपा तु श्रुतिर्विनियोक्त्री श्रुतिर्यथा । यजेतेत्यादिका श्रुतिर्भावनाया धात्वर्थसं
करणत्वं प्रतिपादयति । एकप्रत्ययरूपा तु श्रुतिर्यथा पशुनेति प्रागुक्ता सुरूपा जेतेति तिङरूपा च तत्पाहि
कर्त्रैकत्वादिसंख्या भावनायां विनियुज्यते श्रुत्या ऽत्र च चैतौ तातितमते ऽभिहिताद्युत्सर्गः । तद
पवादस्त्वनेकार्थकप्रत्यये कर्त्रैकत्वविधिभ्यामवृत्ता या भावना पत्ति डि सुपि च पशुनेत्यादौ एक
त्वलिंगाभ्यामवच्छिन्नस्य करणादिकारकस्य देवतातद्धिते च देवतयावच्छिन्नस्य द्रव्यस्याभिधानं गौका

३५ रात। तदुक्तं तत्रैव पञ्चैकत्वाकरणे किंचैकेनाभिधाने न युगपदभिधीयमाने संख्याकारके भिधे
विते एवाभिधीयेते अन्यथा युगपदभिधानायोगाद् द्वादिशाहेष्वदर्शनादतेभिधानात्स्वकार
कतया प्रतीयमानस्यैकत्वस्य क्रियापार्थत्वं श्रौतमेवेति। न्यायरत्नमालायां चांगनिर्णये उक्तं तथा
नेकार्थाभिधानमेकेन शब्देन युगपत भवति विभक्त्यैव लिंगसंख्याकारणां तत्रैतेषामन्वितानामे
वाभिधानेऽनन्वितानामनेकेषामर्थानामेकेन शब्देन युगपदभिधानस्यैकशेषमंतरेणासंभवात् अ
रुणशब्देनैव चिदेवनादीनां अन्यथा गामानयेति वर्णैके विद्यक्तिमत्तमानयेति नियुक्तो विदेवनादाना
मन्यातममानये न्न संदिहात संदिग्धे च किं परायं प्रयुक्त इति। तस्मादन्विताभिधाने तत्रापि प्रतीतिश्चैलेन नु
कारकं प्रधानं लिंगसंख्ये गुणतः सुपि तिङपि भावना प्रधानं कर्तृसंख्यादि गुणभूतं। देवतातद्धिते द्रव्यं
प्रधानं देवता गुणभूते नाद्वितघावोक्तमभियुक्तैः पदार्कर्मादयो विभक्त्यर्थास्तादेकत्वादयो विशेष
णत्वेनेति तद्भावाभावप्रधानमाख्यातमिति। अधितानिधानवादं तेनुमत्वर्थापाते प्रव्यय्यन्विताभिधा ३५

35

नमु क्तामत्वर्थीया अपि विशिष्टमेवाभिदधति न हि तेषां वाच्यांतरं निरूप्यते हिरण्यमालिन ऋत्वि

ज इत्यत्र विशेषणभूता हिरण्यमाला तावत्स्वरूपसैवोक्ता ऋत्विजोपि विशेष्याः स्वशब्देन मतुपु कि

मभिदध्यादन्यद्धि शिष्टादिति। तत्रैव पदेष्वन्विताभिधाने नवेति मतद्वयमुक्तं। तत्राहि कथं तर्हि

नाप्यकारेण प्रातिपदिकादुच्चरंती द्वितीया विभक्तिः प्रातिपदिकार्थो विशेषक इत्याह इति प्रत्यय

स्यान्विताभिधायित्वमुच्यत इति गुरुमते भंशं किल्वाहि धा समाहितं भवत्यत्तेवा कथं सर्वशब्दा

नामन्विताभिधायित्वे सति विशेषणप्रत्ययस्य तत्कथ्यंते तेन ग्रंथानुगुण्यात् छद्दांतराणां स्वरूपमा

त्राभिधायित्वं प्रत्ययस्य त्वन्विताभिधायित्वमिति व्यवस्थापं। यद्यानेनाप्यन्विताभिधायित्वं प्रत्ययस्य

नोच्यते किं तर्हि प्रत्ययेन स्वार्थोऽभिधीयमानः प्रथमावगतं गतप्रकृत्यर्थानुरक्त एवावगम्यत इति

तत्रान्वयव्यतिरेकाभ्यां प्रकृतेः प्रत्ययस्य च स्वस्वार्थेऽनुरागांशे च प्रकृति प्रत्ययसमभिव्याहारस्यैव पदां

तरसमभिव्याहारस्यैव पदार्थानुरागे निमित्तत्वं विविच्यते। अतोऽनुरागांशस्य समभिव्याहारादेव मति

ति सिद्धेने प्रत्ययस्य तत्र शक्तिः सत्तु स्वार्थमात्रमेवाभिधत्ते तदुक्तं शाह । प्रकृतिप्रत्ययौ जूतः प्रत्यया
र्थं सह इति यत्ते मे दे नैवाभिधानेपि प्राधान्येनैते दुच्यते : नान्यावयवशक्तिः काचित्प्रत्ययार्थं प्रयाविध
ते यत एकस्माद्विशिष्टार्थगतिर्भवेत् : नित्यं विशिष्ट एवार्थे प्रत्ययोपस्थ वर्तते : तस्सर्वं तरविज्ञात
प्रकृत्यर्थविशेषणादिति ॥ अत्र हि त्तावपत्त एव यारमार्थिक इत्येवं परतया शब्दांतराधिकरण
सिद्धांतवार्तिकं भट्टसोमेश्वरेण व्याख्यातं । यस्माद्धि प्रकृतिप्रत्यययोः स्वार्थाभिधाने स्मृतेराचाराद्व
निर्बंधे विवक्षितक्रमत्वेन पूर्वप्रयुक्तप्रकृत्यर्थव्याप्ते तेषु प्रतिपत्तृषु प्रत्ययाः संनिपतंतस्तत्कृत
द्भुवं धमेव स्वार्थं वदंति तस्मान्न कदाचित्प्रत्ययार्थः शुद्धो लभ्यते यथोक्तं प्रातिपदिकाद्युच्चरंती
द्वितीया विभक्तिः प्रातिपदिकार्थो विशेषक इत्याहतीति ॥ सोयं सुवंततिङ्‌न्तप्रदेपाकत्तृ प्रक
रः पाचकादिकृदंतेष्वुक्तः पाकं तु पचिरेवाह कर्तारं प्रत्ययो ण्वकः । पाकयुक्तं पुनः कर्तारं वे
नांशेनाभिधीयत इति । अयमेव प्रकारो देवतातद्धिते मत्वर्थीयादावपि व संभवति । अतः पदस्तुते

वैलापस्याविधिविस्तुत्यपिहि भावनाश्रवस्तुनपागादिभाव्यमाल्लं विन्तुत्तमेत्यादिः स्वर्गकामाधि
करणादेर्मिथ्यादानांपरस्तुतित्वव्यवहारेनाल्विताभिधाननिबंधनः किंतु विशिष्टाभिधान
त्रनिबंधनः। भवद्विशेषणाभिधानेविनाकथंविशिष्टाभिधानमितिवाच्यं। विशिष्टग्रहणेने
ष्टमगृहीतेविशेषणेऽभिधानेभिधानेत्तुनकेनचिद्दिहाश्रितइतिकर्त्रधिकरणवार्त्ति
कोक्तरीत्यातदुपपत्तेः नन्तुपजेतपश्तुनेत्यादिपदं विशिष्टाभिधानमात्रवाहेत्तुतस्ततः समारभ्यापात्र
ण्वितनैल्पाच्छुतित्वापत्तिस्तेनतदधिकरणेतस्याः। स्तुतित्वमाशंक्यपाकेन्तुपचरितवाहेतिहस्येकारि
कोपन्यासेनान्वयानभिधानाच्छुतित्वाभावोक्तिरस्तुक्तासत्यमस्तुत्वचयुक्तिरेवेघातत्रोक्ताथापि
तःपरंतत्रस्तुक्तिरुक्ताऽग्रथापिसमारभ्यासंबंधमभिदध्यात्तथापिनसातत्रप्रमाणमितिसेवस्तुति
त्वनिरासाहेतुर्मुख्यः। किंचपाराण्यस्तेत्रेभिहितंनस्तुत्यादेवः पारार्थ्यमभिदधतीतिब्रूमः किंत
र्हिविधिसहिताः पारार्थ्यंवोधयंतीत्यादितेनविध्यभावादपिनसमारभ्यापाः स्तुतित्वमितिसमंज

३७

37

संसवौ। एवं प्रत्ययश्रुतिः पदश्रुतिश्च निरूपिता। अथ कारकविभक्तिरूपा श्रुतिर्निरूप्यते। ननु सु
प्तिङ्प्रत्यययोः कारकविभक्त्योश्चैकाभेदोपेन साधुत्वं निरूप्यते। उच्यते। सुबादिश्रुतिः स्वोक्ता
नामेवार्थानामनन्यविधेयत्वात्। कारकविभक्तिस्तु प्रातिपदिकार्थक्रियायोरस्वार्थपरत्वेऽपि विनियो
क्ता इति भेदः। न तत्र कारकविभक्तिर्नैकधा तत्र कर्मणि द्वितीयेत्यनुशिष्टा ग्रामं हानं वहतीत्यादिः क
र्मणि द्वितीया। तृतीया वहाश्वं दसीत्यनुशिष्टा पयवाग्वा जुहोतीत्यादिः कर्मणि तृतीया गत्यर्थकर्मणि
प द्वितीया चतुर्थ्यौ च ग्रामं गमनश्च भीत्यनुशिष्टा ग्रामाय यातीत्यादिः कर्मणि चतुर्थी। कर्तृकरणयोस्तृ
तीयेत्यनुदिता सोमेन यजेत ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यादिः करणे कर्तरि च तृ
या संज्ञोन्यतरस्यां कर्मणीत्यनुदिता पितरं वा संजानीत इत्यादिः कर्मणि तृतीया। चतुर्थी संप्रदा
ने इत्युक्तो मेघावरुणाय दण्डं प्रयच्छतीत्यादिः संप्रदाने चतुर्थी। क्रियार्थोपपदस्य च कर्मणि स्थानिन इत्यु
क्ता फलेभ्यो यातीत्यादिः कर्मणि चतुर्थी। मन्यकर्मण्यनादरे विभाषाऽप्राणिष्वित्युक्ता तत्रैव सैवा ३७

पादाने पंचमीति विहिता ग्रेस्तृणान्यपचिनोतीत्यादिरपादाने पंचमी। करणे च स्तोकाल्पकृच्छ्रकतिपय
स्यासत्ववचनस्येति विहितास्तोकेन स्तोकान्मुक्त इत्यादिः करणे पंचम्यादिर्यस्तदर्थस्येति चोदिताश
तस्य दीव्यतीत्यादिः विभाषोपसर्गे इति वचोदिताश्शतस्य प्रतिदीव्यतीत्यादिः प्रेष्यब्रुवोर्हविषो देव
तासंप्रदाने इति च विहिताग्नये छागस्य हविषो वपाया मेदसः प्रेष्यानुब्रूहीति वेत्यादिर्यजेश्च कर
णे इति च विहिताघृतस्य यजते इत्यादिः करणे षष्ठी। चतुर्थ्यर्थे बहुलं छंदसीति चोदिता पुरुषमृग
श्चंद्रमसे गोधाकालका दार्वाघाटस्ते वनस्पतीनामित्यादिः संप्रदाने षष्ठी। कृत्वोर्थप्रयोगे कालेधिक
रणे इति चोदिता पंचकृत्वो ह्नो भुंक्ते इत्यादिरधिकरणे षष्ठी। कृतीति चोदिता कृद्योगस्य कृतिः
भवतः कर्तेत्यादिः कर्तरि कर्मणि च षष्ठी। उभयप्राप्तौ कर्मणीति चोदिता चित्रमगोपेन गवां दोह इत्या
दिः कर्मणि षष्ठी॥ सप्तम्यधिकरणे चेति पदिष्टा से मेदर्शपूर्णमासाभ्यां यजेतेत्यादिरधिकरणे सप्तमी
इति कारकविभक्तिरूपास्तु तिस्रो निरूपिता॥ तादर्थ्ये चतुर्थी यथा सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो

दर्शपूर्णमासवित्यादिः शेषषष्ठ्यादिविधागुणाबप्राधान्येचात्तत्राद्यायथाज्जसौवानानुपांशु
पौर्णमास्यायजत्वित्यादिः प्राधान्येषष्ठीयथातिस्रएवसाह्नस्योपसदोद्वादशाहीनस्येत्यादि
ःमहसोमेश्वरमतेत्वन्यात्रापिविनियोगश्श्रुतपः इतिकरणाः इषेत्वेतिशाखाछिनत्ती
त्यादिः तथाधातुसंबंधविहितेनाणमिष्ठकामजुहोतीत्यादिः।तादृशएवक्त्वाशत्प्रत्यये।
पितत्रापिद्रूपागतिः पूर्वस्योत्तरांगत्वमुत्तरस्यवापूर्वांगत्वंतत्राद्योदाहरणंयथा।मूलतःशाखां
परिवास्योपवेसंकरोतीतिउपवेशाख्यामूलांगंपरिवासंनाहितोद्योदाहरणंयथावाजपेयेनष्ट्वा
बृहस्पतिसवेनयजेतेति।एवंतद्वादेशात्स्यचयोस्तस्याधारमाघारयेत्यादिः एवंनुमुत्पुलोक्तिप्र
योक्रियार्थोयोऽभवचनाश्चणाकर्मणिचेतिविहितान्नुमुनादयेः।एवंसंख्यायाःक्रियाभ्यावृत्ति
गणनेकृत्वसुजितिविहितः कृत्वसुएवंद्वित्रिचतुर्भ्यः सुजितिसुच्प्रत्ययोपिचेदिरसिवदिहि
त्वेतित्रिवेंदिषोत्तुतेत्यादिः एवंलृट्- आग्नावैष्णवमेकादशकपालेतिर्वपेद्दर्शपूर्णमासावाप ३९

स्यमानइतीक्रियार्थायांक्रियायामुपपदेन्तुमुन्विशिष्टेनलृटास्युस्यैवारंभांगत्वादिष्टेः पार्थसारथिमतेक्

इतिवरणादिसप्तसुवाक्यीयोविनियोगोनस्यात्ः तत्रेतिकरणस्यतावत्तथाह्वानमपीतिचेद्दित्य

धिकरणेसिद्धांतेस्तुतित्वंनिरस्तंशास्त्रदीपिकायांक्त्वाप्रत्ययेपिवाक्यीयमंगत्वमुक्तंचतुर्थतंत्ररत्ने

तज्ज्ञापकलेसफलवाजपेयसमभिव्याहृतंवासोदाजपेयांगमितितथाचतुर्थेएवतउपवेशाधिकरण

उक्तं।नचपरिस्येतिक्त्वाप्रमयाद्युपवेषकरणार्थपरिवासनंवाक्यसंयोगाद्दललीपस्याद्वितीयेपेत्यावि

पत्तुधातुसंबंधविहितस्यक्त्वाप्रत्ययोवाजपेयबृहस्पतिसवयोरेवसंबंधमावक्ष्टइतितत्परमतेति

पात्वयस्यवावक्तार्थत्वोपपत्तेर्वाच्यत्वायोगात्प्रधानसंबंधेप्रत्ययाइतितुसाधुत्वाद्वारण्याभमात्रार्थे

क्रियांतरसमभिव्याहारएववणस्सलादेःसाधुतायथाक्रियायोगएवप्रादेरुपसर्गस्येतित्र्यभिक्राम

धिकरणवार्तिकेपित्र्यभिक्रमणंप्रकृतक्रियामात्रांगंहोमांगमेवेतिभाष्यकृन्मतेसंशयमुक्त्वासंयु

क्तश्रवणात्समाप्तिप्रतद्धेतुवदताकर्मणोमूर्तत्वाद्वाक्येनचसंबंधोपादानादितिवाक्यीयमंगत्वमु

क्तं तथैतोतत्रत्यसिद्धांतेपि सर्वथा तावदसिक्रामिमित्येतत्पदं न क्रियांतरमंतरेण निराकांक्षी भव
तीत्येवोक्तं न क्रियासंबंधं ब्रवीतीति तथा पावजीवाधिकरण वार्त्तिके यावज्जीवपदाख्यातश्रु
तिद्वित्वसंभवः। मत्वर्थे भवतस्तत्र लक्षणा द्वित्वता भवेदिति यावदव्ययजीवधातुश्रुत्याऽभ्यामेव
निमित्तत्वसिद्धांतउपपादितः ननु णमुलश्रुत्येति संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुचः द्वि
त्रिचतुर्भ्यः सुच तुमुण्वुलौ क्रियायां क्रियार्थायामित्येताभ्यामपि शब्दस्मृत्तिपो धातुसंबंधप्रत्यया
इति वदेव व्याख्येयाः। वेदिरसि बर्हिषे त्वेति त्रिर्वेदिं प्रोक्षतीति मंत्रावृत्तिनावृत्ति विवितार्थैकाद
शाधिकरणेपि क्रियावृत्तौ हि सुन् विधीयत इति ग्रंथो वाचीमक्रियावृत्तपोशाय एवा पत्नुनच मैत्रा
ग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारभमाण इत्यारंभणीयाविधौ लट्प्रत्ययोपि
श्रुत्यैव तादर्थ्यं स्यान्निधापक इति सिद्धांते मिश्रैरुक्तं तत्परमतमेतमेवाग्नावैष्णवमेकाद
शकपालं निर्वपेद्दीक्षिष्यमाण इति लट् श्रुत्यैवापचमेमिश्रैर्वोक्वायो विनियोग उक्तः निरपेक्षै ३९

ववाक्येन दातव्यर्थे हि विधीयत इति तिं तच्चान्येपि परेण वेदनादित्यधिकरणे पंचमे उक्तं। आग्नावैष्ण
वो वाक्येन दित्तिष्यमाणपदसमभिव्याहारेणादीक्षार्थ इति। समेन पक्ष्यमाणो मिमादधीत सत्रायि वा
कायमेवाधनोत्तरकालस्य सोमांगत्वेन यस्तुतित्वादेव यदध्यवतं त्वरतं पक्ष्यमाण इति च दीक्षिष्यमा
ण इति वक्त्रापार्थायां क्रियायां सुपपदे ऌट्प्रत्ययः सोमेन यक्ष्यमित्यर्थ इति तदपि क्रियायांतरयोग एव ऌटः
साधुत्वोक्तिद्वारा वाक्याय विनियोगोपपादनार्थमेवेति संक्षेपः। एवं तुमुन्ण्वुलौ क्रियायां क्रियार्थायामि
ति विहितयोस्तु सुण्वुलोपपदत्वप्रयोगः यक्ष्याति याजको यातीत्यादिः एवं तदर्थिमसूत्रेण भाववचनाश्चे
त्यनेन क्रियार्थायां क्रियायामुपपद एव विहितानां घञादीनां प्रयोगः पाकाय याति भूतये यातीत्या
दिः एवं तदुत्तरसूत्रेणाण्कर्मणि चेत्यनेन क्रियार्थायां क्रियायामुपपद एव विहितस्याण प्रत्यय
प्रयोगः गोदायो व्रजतीत्यादिस्तत्र सर्वत्र वाक्योपयाने अर्थतः। इति स्तुतिनिरूपणं लिंगा
दिभेदास्तु पूर्वमेव निरूपिताः इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसैतसार्व

५० 40 ज्यघुरंधरश्रीमदनारायणात्मजभट्टशंकरकृते मीमांसावालविधिभेदनिरूपणं ॥ अथार्थवादस्तद्भा
नावर्णयभेदा निरूप्यते ॥ तत्रार्थवादस्त्रिविधः ॥ गुणवादः भूतार्थवादश्चेति तदुक्तं विरोधे गुणवादः
स्यादनुवादोवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति ॥ विरोधः प्रमाणांतरेण अवधारि
ते प्रमाणांतरेण निश्चिते ॥ तयोर्विरोधधारितत्वयोर्हानादभावे ॥ तत्र विरोधे गुणवादः स्यादित्यस्योदा
हरणं यथा धूमएवाग्नेर्दिवा ददृशे नार्चिरित्यादि ॥ धूममात्रदर्शनस्यार्चिरदर्शनस्य चार्चिषोऽपि दर्श
नेन विरुद्धत्वात् हराद्रूपस्त्वेमवदर्शने विप्रूषे सामान्यवाविनादर्शे रौपचारिकत्वात् ॥ अनुवादो
वाधारित इत्यस्योदाहरणं तु अग्निर्हिमस्य भेषजमिति तत्त्वाध्यायाध्ययनवे
धुर्यादेवित्याद्या ॥ अवैदिकानां मंत्रत्वप्रसिद्धेस्तस्याएवचवैदतीपक मंत्राधिकरणे मंत्रत्वव्यवस्था
प्रयोजकत्वोक्तेर्विध्यंतरैकधाकत्वाभावश्च ॥ तस्माद्वायुर्वैक्षेपिष्ठा देवते ॥ त्यादेव अनुवादाव
धारित इत्यत्रोदाहरणं ॥ भूतार्थवादस्तद्धानादिति त्रैपनिषदाउदाहरंति देवता विग्रहभोज ५०

नत्वीश्वप्रसादफलदातृत्वप्रतिपादकानर्थवादानन्नजापतिरात्मनोवपामुदखिदत्तः आज्ञी
मिरिवड्डूतादेवादेवान्प्राणातितृप्तएवैनमिंद्रप्रजयापशुभिस्तर्पयतीत्यादौशतयुक्तनवमेवि
ग्रहादिपंचकनिरासात्तातदेतन्नवमार्थप्रपंचवक्ष्यामः तस्मादत्रविरोधाभावेपिगुणवादागांका
राङ्कृतार्थवादस्त्वद्वानाञ्चित्यात्रपत्रदुःखेनसंभिन्नंनवग्रस्तमनंतरंअभिलाषोपनीतंयत्तत्सुखंस्व
ःपदास्पदमपित्येवादाहार्यपाइदंचनलक्षणंविशेषणचतुष्टयव्यावर्त्याभावात् किंतुस्वरूपकथनं
मात्रंविशेषणचतुष्टयेनापिहिसांसारिकासुखवैलक्षण्यमस्यद्बुवतासुखस्वावांतरजातिःस्व
त्वमुपलक्ष्यतेतत्रहिदुःखमिश्रमिदंतुनंतथाएवंसांसारिकंराज्यादिसुखंवर्षाघवधिप्रमाणमा
वाच्छनुकृतापहारादिशंकाग्रस्तंइदंत्वर्थवादादादिप्रमाणतोवर्षादिपावत्कालभोग्यत्तपायमितंन
का तन्मध्येपहारादिशंकाग्रस्तातथेदमनंतरमविच्छिन्नंसंततंवर्षादिपर्यंतमित्तरस्तुनतथा।किंतुसु
खदुःखाभयरहितावस्थाविच्छिन्नं।एवमिदमभिलाषमात्रेणोपनीतमुपस्थितंनस्वकवंदन

४२ वनितादिविषयापेक्षमितरत्तु विषयापेक्षमेव। पद्द्वेदेऽप्ययत्नानपेक्षाभिलाषमात्रोपनीतं विषय
मितरत्तु प्रयत्नोपनीतं विषमिति। अत एवाहुस्त्वधिकरणे अस्त्यर्थः सर्वशब्दानामिति सूत्रव्याख्यान
णे अश्वदेवतास्वर्गाः सममादर्गवादि क्षितिवैयाकरणमतनिरासावसरे तदुक्तं दर्शितं च विषमेप्यो
ध्येकार्यसामर्थ्यमिंद्रादिनिर्मिश्रसुखसंततिरिति वार्तिके निर्मिश्रसंततिपदाभ्यामायत्ततीयविशे
षणार्थावेव स्वर्गत्वजात्युपलक्षणार्थमुक्तौ तद्व्याख्याने महेश्वरेण तु तद्वार्तिकव्याख्यार्थवार्ति
के केवलमेव सुखमित्युक्ते दुःखाभिश्रत्वमेव स्वर्गत्वसामान्योपलक्षणत्वेनोक्तं संततित्वं तु चिरका
लतारत्य दुःखाभिश्रत्वेनैवाक्षिप्यत इति वदता अलौकिकसुखविशेषप्रतिपत्त्यर्थं तदुपात्तमि
त्युक्तमिति। भूतार्थवादस्तद्धानादित्यत्रोपनिषदोऽप्युदाहरणं ताश्चपि हि विध्युपयोगिस्वर्गस्व
रूपनिरूपणार्थार्थवादवच्छ्रवणादिविध्युपयोग्यात्मस्वरूपनिरूपणार्थत्वेन वाक्यशेषा एव।
अत एव भावार्थपादे विंशतिमर्थ्यपारभेदांस्तच्चोदकेषु मंत्राख्या शेषे ब्राह्मणशब्द इत्येतत्सूत्र ४२

ह्रूप व्याख्याने भाष्ये धुदर्शपूर्णए तदपि प्रापिकमित्युक्तं तत्र सतं ज्ञानपनं तं ब्रह्मसादेह्रूपलक्षणार्थमि
त्युक्तं भदसोमेस्वरेण एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावस्यां यजत इति विद्वान्वाक्यद्वयं द
र्शपूर्णमासाभ्यामिति द्विवचनोपपन्नार्थं समुदायद्वयसिध्यर्थं चेष्टं देवेन यजेत इति वत्प्राची
नप्रवणे वैश्वदेवेनेति देशविधिस्थैकवचनोपपन्नार्थैक समुदायसिध्यर्थं मन्ता अर्थवादोदाहरण
रमिव्वान्मतएवत्रि भागएववेदइत्युक्तं विध्यर्थवादमंत्राणामुपयोगोधुनोच्यते इसादौ तान्
ता अर्थवादस्तद्वानावित्ये उदाहरणं तत्र यथा अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारय
तीति अत्र तत्ता थेउ परिधारणस्यापि हि शब्दत्यागेन विधिरित्युक्तं पुनरप्यर्थवादोस्त्रिविशष्टि धः अ
ग्नीः सोकामयत प्रजाः सृजेयेती प्रलापः न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा वेति परिदेवनं ये
मामधुदंतं तते मा प्रत्यमुंचते तिलथापावज्ञीवाधिकरणे वार्तिके आहिताग्निर्वा एष सन्नाग्निहो
त्रं जुहोति न च दर्शपूर्णमासौ यजते या अद्धुति माजोदेवता स्ता अनुध्यायिना करोतीति परिदे

वनसरूपोर्थवादइत्युक्तंशेषः अस्तुतःसोममाहरेति। अन्वेषणं इहवासइहसइति। अग्रः वेदस्व
र्णाचतीक्ष्णमिमितिप्रतिवचनंस्विघ्नेति। अनुषंगः यद्वस्तेनकंइद्रूपेतयामनेभावकाः प्रजाः स्युर्यस्य
यतनग्नंभावुकाः कस्यविषाण्यांकंइद्रूपतइति। इहनग्नंभावुकाइत्यत्रप्रजाः स्युरित्यानुषंगः
इतिकरणवकुलोर्थवादः अत्सुजपंनोत्सृज्यामि-तिमीमांसंतेब्रह्मवादिनस्तदाहुरुत्सृज्यमेवे
तिअमावास्यायांचपौर्णमास्यांचोत्सृज्यमित्याहुरेतेहियज्ञंवहतइतितेत्वावनात्सृज्येदित्याहुर्ये
अवांतरंयज्ञंभेजातेइतीतिइत्याहोपनिवद्धोर्थवादः देवस्यत्वासवितुः प्रसवइतिस्फामादत्तेप्र
सूत्येइतिविधेर्वाक्यशेषः अश्विनोर्बाहुभ्यामित्याहअश्विनौहिदेवानामध्वर्यूआस्तांपूष्णोहस्ताभ्या
मित्याहपात्यैइति। आख्यापिकारूपोर्थवादः पुरुषंवैदेवाः पशुमालभंततस्मादालब्धान्मेधउदक्रा
मत्सोश्वंप्राविशत्तस्मादश्वोमेध्योभवदथैनमुत्क्रांतमेधमत्याजंतसकिंपुरुषोभवत्तेश्वमालभंतसो
श्वादालब्धादुदक्रामत्सगांप्राविशदितिहेतुवन्निगदोर्थवादः शूर्पेणजुहोतीत्यस्यविधेर्वाक्यशेषः ते

नस्यत्तंक्षिपतइति।निर्वचनरूपोर्थवादःतदेनमधिनोत्तद्दध्नोदधित्वमितिनिंदार्थवादःनब्राह्म
णामानिगायतीतिनिषेधस्यार्थवादउपवीतावाएतस्याग्नयइति।प्रशंसार्थवादोवायुर्वैक्षेपिष्ठ
देवतेति।पद्यपिनिंदार्थावादव्यतिरिक्तेषुसर्वेष्वप्यर्थवादेषुप्रशंसार्थमविशिष्टंतथापाहवा
सुप्रशंसाद्वाराविधेयवापवाप्रसुयागप्रशंसादूतरत्वनुतश्चेतिभेदःसंप्रापार्थवादःइतिहोतव्यं
गार्हपत्येनहोतव्यमितिविधिकल्पकोर्थवादःयजमानसंमितौदुंवरीभवतीतिपरकृतिरर्थवा
दःइतिहस्माहवर्कुर्वार्ष्णिर्माषानेवमह्यंपचतेतितस्मादारण्यमेवाश्नीयादितस्यविधेर्वाक्य
शेषःपुराकल्पोर्थवादःउल्मुकैर्हस्मपूर्वेसमाजग्मुस्तानसुरारक्षांसिनिजघ्नुरितितस्माद्रूपते
रेवाग्निषुजिर्मथ्यानिवपेरन्नितिविधेर्वाक्यशेषःअजपोश्वमेदावार्तिकहृतेवपुक्तःएकपुरुषक
र्तृकमुपाख्यानंपरकृतिःबहुकर्तृकंपुराकल्पइति।बहुकर्तृकपदंद्विकर्तृकस्यापिसंग्रहण
र्थमनेककर्तृकमितिव्याख्यातंमदसामेभ्यरेणार्थवादाधिकरणोद्विकर्तृकोदाहरणंतुःताव

४३
43

हूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्तीति व्यवधारणकल्पनार्थवादः नेतसश
रवयाचकात्रिष्कषिंविकर्षणतित्यस्य विधेर्वाक्यशेषः आपोवेशांतावीतानिरेवास्यशुचश्शमयती
तिषघास्तुचैकोचाक्षिपतेइतियावतोश्वान्प्रतिगृह्णीयादितनयोर्व्यवधारणकल्पनाविध्योरु
पसंहारगतयोरुपक्रमगतथेदविषयदानविषयार्थवादवशेनवेददानविषयत्वेवकल्प्यतेय
वमुपक्रमस्थवेतसावकाविषयविधिवशेनोपसंहारस्थार्थवादगतेष्वप्सुकशाम कल्पनापि कि
तुवेतसावकविषयमितिकल्प्यतेइतितदेवं विशतिमर्थवादभेदानभाचार्थपादेतञ्चोदकेषुमंत्रा
ख्याशेषे ब्राह्मणशब्द इत्येतत्सूत्रद्वयव्याख्यानावसरे भाष्यएवप्रदर्शितएतदपिप्रासंगिकमित्युक्तं
तत्सत्यंज्ञानमंतंतंब्रह्मेत्यादेरुपलक्षणार्थमितिमहर्षिसोमेश्वरेणव्याख्यातंअतोन्येसंभवंतीयेकलि
त्केचिद्विरूपिताः भाष्यवार्तिककाराद्यैस्तान्भेदाननिदर्श्यहेतथाहिपूर्वहेतुवन्निगदोर्थवाद
उक्तः कश्चित्तुहेतुविधिरर्थवादः आदित्यायामिडांतातित्यासंतिष्ठत इतिवचनदनूपाजापाने ४३

पस्यत्तुपञ्चकृत्वगृह्णातीति प्रकृतौ विहितस्योपभृत्यष्टगृहीतस्य चोदकप्राप्तस्य निवृत्त्यर्थं चतुर्गृहीता
न्याज्यानि भवंतीति नह्यत्राप्राप्ताज्यग्रहणमपघतीति चतुर्गृहीते विधीयमाने त्वप्राप्तांशस्य हेतुत्वाभि
धानाधत्त्रेयत्रानुप्राप्ताभावस्तत्र तत्राष्टगृहीताभावइतितापत्तेः प्रकृतौ चाष्टग्रहणस्य चतुरष्टप
लक्षणार्थत्वघातनात प्रयोजनार्थं जुहूत्वान्यानयने नियोगतो चाद्दैमवसमानेतव्यमितिज्ञायते एवंच
हेतवधिकरणं वार्तिके उदाहरणे कौनचपरमार्थहेतवइति प्रत्युदाहरणवत्तुर्थवक्ष्यमाणं संक्षिप्त
नइसोमेश्वरेण व्याख्यातं तथाप्यैन्द्रेपि हविर्देवतेति विधेययागविशेषणदेवतामन्त्रवायुप्रशंसा
ण विधेययागप्रसंसेत्युक्तं किञ्चित्त्वर्थवादः साकं देवतेति विधेयप्रशंसार्थः यथा प्रजापतिरात्मनो
वपामुदखिदत्तामग्नौ प्रागृह्णात्ततो जस्तूपरः समभवत्तेनायजत ततो वै स प्रजाः पशूनसृजत प
प्रजाकामः पशुकामः स्यात्स एतं प्राजापत्यमजं तूपरमालभेतेति तथा विधेयपदार्थेद्विशेषण
व्यतिरिक्तप्रशंसाद्वारापि विधेयप्रशंसार्थः कश्चिदर्थवादः यथा दशमे त्र्यक्षिघार्यस्त्वेवं कान

४५ भिघार्योद्भृतियदभिघारयेत्तद्रुद्रायास्यपशूनपिदध्याद्यन्नाभिघारयेन्नतद्रुद्रायास्यपशूनपिदध्या
44
त्तत्रसूक्तेऽप्यभिघार्यएवनह्मनस्यनभिष्टंतहविरस्त्वीतिसुदाहृतं।तत्रार्थवादाधिकरणेवार्तिक
कारेणोक्तं पात्राभिघारयेत्तद्रुद्रायास्यपशूनपिदध्यादितिस्तुतमप्यनभिधारणेनाप्यपिध्यते
इति।तथाविधेयव्यतिरिक्तनिंदाद्वारापिविधेयप्रशंसार्थःकश्चिदर्थवादः।सोपिद्विविधः।विधे
तरविहितस्यप्रकृतविधेयव्यतिरिक्तस्यनिंदाद्वाराविध्यंतरविहितस्यप्रकृतविधेयव्यतिरिक्त
स्यवानिंदाद्वारेति।तत्राद्योयथानवमेपदचाप्यनुवर्तेतदसुराश्रवचापनयत्साम्नास्तवतेतदसु
रानात्वाचायन्यएवंविद्वान्साम्नास्तुवीतेत्युदाहृतं।तत्रार्थवादाधिकरणेवार्तिककृतोक्तं तत्रांते
साम्नविधानात्प्रशंसार्थमृचोनिंदैवीगम्यतइति द्वितीयोयथाप्रातःप्रातरनृतंतेवदंतिपुरो
दयाज्जुह्वतिपंगिहोत्रंदिवाकीर्त्यमदिवाकीर्तियंतःसूर्योज्योतिनतदाज्योतिरेषांतस्मादुदितेहो
तव्यमिति।एवंपयात्तिययोक्तुतापान्नमाहरेसुस्तुदेक्तव्याघउदितेजुहुतितस्मादनु दितेहो ४४

तव्यमिति॥ अत्र सर्वत्रोत्तरविधिविहितानुदितहोमनिंदाद्वारा उदितहोमस्तुतिः उत्तरत्र सर्वविधि
विहितोदितहोमनिंदाद्वारानुदितहोमस्तुतिरिति॥ तदिदं शाखांतराधिकरणे उदाहरणद्वयमुदाहृतं
ज्ञातव्यं॥ तथा हितवाधिवत्कश्चित्फलविधिरर्थवादः यथा प्रतितिष्ठंति ह वा य एता रात्रीरुपयंतीति॥७॥
तथा कश्चित्निषेधफलार्थवादः यथा तस्माद्ब्राह्मणाय नावगुरेतेति निषेधे यो ब्राह्मणायावगुरेत्तं शते
नयातयादिति वर्षशतयातनारूपं फलं वाक्यशेषात॥८॥ तथा कश्चिद्देवविधिसरूपवत्फलविधिस
रूपोर्थवादः यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति एषु त्रिष्वाद्यांत्यौ चतुर्थे निरूपितौ
मध्यमस्तु तृतीयशेषे पौसर्वपरिदानादित्यधिकरणे निरूपिते॥ तथा कश्चिद्देवताविधिरर्थवादः
यथा वाजसनेयिनं देवयाज्ञिकोत्सादं वा एत मासनो जनयते अग्निमिति पूर्णाहुतेर्वाक्यशेषमग्निदे
वताश्चपकमाह॥९॥ तथा कश्चिद्देवताविधिसरूपोर्थवादः यथा विष्णुरुपांशु यष्टव्योऽजामित्वाय
प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वायेत्येतेषामेदेनोपांशुयाज

त्योग्नामीतेवैसवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलैः प्राप्ताविष्ण्वाद्यादेवताउपांशुयाज
स्तुत्यर्थं कीर्त्यत इत्युक्तमुपांशुयाजाधिकरणे। २०। तथा क्वचिद्द्रव्यविधिरर्थवादः यथा वासः परिध
त्त इति विधौ एतद्वै सर्वदेवत्यं यद्वासो यत्क्षौममिति क्षौमशब्दस्य यौगिकत्वादर्थवादित्वे कोऽप्य विधि
: इदं च संदिग्धेषु वाक्यशेषादित्यधिकरणान्ते भाष्यकारेणोदाहृतं। २१। तथा क्वचिद्द्रव्यविधिसरू
पार्थवादः यथा महाव्रते प्रेंखमारुह्य होता शंसतीति विधौ पदा वै प्रजापहत्रा बिशंति प्रेंखोस्तस्मीश्रहे
तीति प्रेंखशब्दस्य यौगिकत्वाद्द्रव्यविधिसरूपेयमर्थवादः तदेतदपि वाकारणाग्रहणे प्रयुक्तानि प्रति
षेधेत्वित्यस्य सदाचारप्रामाण्यप्रतिपादनपरे वार्णिके वार्त्तिककृतोदाहृतं एतानि वै दश यज्ञायुधानी
ति वा चतुर्थे हि एतादृशस्य सर्वनाम्नो द्रव्यवचनत्वाभावेन स्पष्टद्रव्यविधिमाशंक्य तन्निरस्यार्थवादमात्र
मित्युक्तं। २२। तथा क्वचिज्जातिविधिरर्थवादः। यथाग्नेयपदस्याष्टाकपाल इति विधितः संस्कृतं भवाइत्य
स्मिन्नर्थे तद्धितोत्पत्तेर्भवेत् इत्येवं प्राप्ते मंडकादिप्रसक्तौ तेषु रोडाशं क्रमेभूत्वा प्रसर्वतमपश्यत्त्रिसिवाक्य ४५

शेषः प्रयोडाशत्वं जातिमात्रशापकः। इदमपि संदिग्धेषु वाक्यशेषादिति न्यायादेव सिद्धं ॥२३॥
तथा कश्चिज्जातिविधिसरूपोर्थवादः। यथा तावद्गताम अग्नीषोमावाज्यस्यैव नावुपांशुपौर्णमास्यांप
जन्निति। एतद्धि अग्नीषोमपौर्णमासीकालविधिपरत्वान्नाज्यत्वजातिविधिः किंतु सर्वस्मेवाएतद्यज्ञा
यगृह्यते पतद्ध्रुवायामाज्यमिति शाशाउपांशुयाजद्रव्यपरिच्छेदकाज्यत्वजातेरनुवाद इत्युक्तं दशमे
उपोपाते ॥२४॥ तथा कश्चिद्गुणविधिरर्थवादः। यथास्त्रणारूपदधातीति वार्तिककृन्मते भाष्यकृद्वचो
पधानमात्रविधिमेत्रानुवादश्च किंतु उपधानमंत्रविधाविपि दोषोक्तेर्मंत्रमात्रविधावपि दोषात्कृ
ष्टिरूपविधो मुख्यानां सहस्रलिंगकानामेव मंत्राणां विधयस्सक्तो यत्सस्तैर्दशरूपकाउपदधातीति
वाक्यशेषात्सप्तदशसंख्याविधिः तदेतत्सप्ताधिकरणे नद्रसोमेश्वरेणोक्तं ॥२५॥ तथा कश्चिद्गुणवि
धिसरूपोर्थवादः यथायथायदष्टाकपालो भवति यच्चैवैनं ब्रह्मवर्चसेन पुनातीत्यष्टसंख्याविधिस
रूपत्वात्तदिदमुक्तं वैश्वानराधिकरणे ॥२६॥ तथा कश्चित्क्रियाविधिरर्थवादः। यथामृताग्निहोत्रे अधस्ता

त्समिधंधारयन्ननुद्रवेदितिविधेर्वाक्यशेषः उपरिहिदेवेभ्योधारयतीति।तत्रतृतीयेउक्तंदेवेभ्यइत्
क्तेदैवाग्नाहोत्रेजावदग्निहोत्रेउपरिधारणस्यकथंचिदप्याचारादिनाप्राप्तेर्हिशब्दपरित्यागेन।
विधिःकल्प्यतइति।२७।तथाकश्चित्किपाविधिसरूपोर्थवादः।यथायोविदग्धा।सनैर्ऋतोयोशृतःस
रौद्रोयःशृतःससदेवतस्तस्मादविदहताश्रपयितव्यःसदेवतत्वायेतिदर्शपूर्णमासप्रकरणाधीतंवा
क्यमौडुवराधिकरणेप्रकरणेचसंभवन्नुपकर्षेणनकल्प्यतविधानर्थक्यंहितप्रतीतिस्त्रेभाष्यकृते।
दाहृत्यविधिसरूपोयमर्थवादः।२८।तथाकश्चिन्निमित्तविधिरर्थवादः।यथाचाग्नेरग्नौप्रयुक्तेलोमेसंस
स्परमुखममन्त्वाग्निंचिनुतेयथासामिगर्भोविपद्यतेतादृगेवतदार्तिमार्छेद्वैश्वानरंद्वादशकपालं
पुरस्तान्निर्वपेदिति।अत्रचतुर्थेवैश्वानरस्यनित्यःस्यादित्यधिकरणेसंवत्सराभरणमर्थवामात्र
मितिनित्यतेतिपूर्वपक्षे।पित्वाकर्लेसमानाधिकरणेपञ्चम्यानिमित्ततांसंवत्सराभरणस्याप्रतिप
दयतितिनैमित्तिकोवैश्वानरयागइतिसिद्धान्तितं।२९।तथाकश्चिन्निमित्तविधिसरूपोर्थवादः।यथ

थाज्योतिष्टोमे श्रुतं यो वा अध्वर्युश्च यजमानश्च देवतामंतरीतस्तस्मा आवृश्च्यते यस्त्राजापत्यं दधिग्रहं गृ
ह्णातिश्रामयत्येवेनामिति तत्र चतुर्थे दधिग्रहो नैमित्तिकः श्रुतिसंयोगादित्यधिकरणे देवतांतरयोनि
मित्तत्वं पूर्ववच्च ग्रहणादिति पूर्वपक्षिते सिद्धांतितं अकर्तृसमानाधिकरणस्य पष्ठद्वस्य निमित्तताश्रुतिपाद
कत्वाभावदर्थवादमात्रमंतरयश्रवणमिति त्यो दधिग्रहइति ॥ २०॥ तथा कश्चित्क्रतौ विधिरर्थवादः पश्चा
षष्ठे चतुर्होतृसंज्ञकैर्मंत्रैः श्रुतस्यार्थतया विहिता जपा होमाश्च चतुर्होतारं प्रयुंजीत चतुर्होत्राग्रजा का
मो जुहुयादित्यत्र पूर्वपक्षितं होमा आहवनीये कार्या एषा वाऽनाहिताग्नेरित्यर्थवादमात्रं जपस्तु पर्य
युक्तशब्देन जपोक्तेः येषामाहिताग्नेः क्रिया जपात्मिका सेष्टिरिति ॥ सिद्धांतस्तु वचनानर्थक्ये ष्टि
शब्दलक्षणपरिहाराय षष्ठ्यां श्रुत्यानाहिताग्न्यधिकाराहोमास्तत्कर्तृकाइति ॥ २१॥ तथा क्वचित्क
र्तृविधिसरूपः पथा षष्ठेइतिह स्माहवट्कुर्वाणिर्मोषाने वमस्यं पचतेतिवृष्णिगोत्रैरव माषपा
कः कर्तव्यो नान्यैरिति पूर्वपक्षयित्वा निरस्तां तदिदं मषपाकविधिकल्पनो क्रत्वाचिंतितं ॥ २२॥

४७ तथा कश्चित्कालविधिरर्थवादः। यथा तावद्भूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यज
न्ति तदेतदृश्यमेउपांशुत्वउक्तं॥२२॥ तथा कश्चित्कालविधिसरूपोऽर्थवादः। यथा अपहतपाप्मानो वा
ऋतवइति यदाह्वचनकादाचनोपनमेवयादधीताब्धयजतेत्यस्य शतपथविधेः शेषस्तेन नवसंत
व्यतिरिक्त अनुविधिर्ज्योतिष्टोमे यदाह्वचनेति धितएवतद्द्विधिसिद्धेः इदं चर्पमेस्वकाले स्याद्वि
प्रतिषेधादित्यधिकरणे तंत्ररत्ने यदाह्वचनेत्यादेः शतपथवाक्यस्य ज्योतिष्टोमे आलतरविधित्वे
क्ते सत्त्वेष्वस्य कालविधिसरूपत्वमर्थादुक्तं॥२३॥ तथा कश्चिद्देशविधिरर्थवादः यथा ताण्डके सरस्वत्या
विनशने दीक्षन्ते अध्वर्युः शम्यां परास्यति सा यत्र निपतति तत्राहार्हपत्यः ततः षट्त्रिंशते प्रक्रमान्प्रक्रा
मति तदाहवनीयः प्रतीपं यन्ति दृषद्वत्याः पत्नमाप्यंति हृषद्वत्या अप्ययेऽपोनप्त्रीयं चरुं निरुप्याप्यातिर्यन्त
ति विधायवाक्यशेषः चतुश्चत्वारिंशदाश्वीनानि सरस्वत्या विनशनात्प्लक्षः प्रास्रवणइति सत्तावंतो
देशं यानेविदधाति। अतएव तदनूद्य प्रहतं। यदा प्लक्षं प्रास्रवणमागच्छेत्यथोस्थानं प्लक्षं प्रास्रवण ४७

47

मौगम्याग्नेयकामापोष्टनिर्वपेतसौमश्यामंवपुरुषंचधेनुकेदत्वाकारपचवंशक्षियमुनामवभृथमभ्य
वयतीतिवार्त्तिकेतुचतुस्त्रिंशदाम्नातातिश्रुतंतरंव्याकरणाधिकरणउक्तं।।२४।।देशविधिसम
पोर्थवादात्पथाषट्त्रिंशत्प्रक्रमाप्राचात्रिंशज्जुघनेनचतुर्विंशतिःपुरस्तादितिसौमिकमहावेदिमा
नविधेवाक्यशेषःइयतिशक्ष्यामहेस्यांकर्तुमिति।।तदेतत्तृतीयेचिकीर्षयाचसंयोगादित्यधिकरणे
न्हसोमेश्वरेणोक्तं।।२५।।तथाकस्मिन्विषेधविध्यर्थवादोयथाएतरेयपिब्राह्मणेहरिश्चंद्रोपाख्या
नेहिरण्यकशिपावासीनश्राचष्टइतिहोत्रकतृकस्यक्रत्वर्थस्यपुत्रकामाहाप्याख्यापवेरन्निति
पुरुषार्थस्यशौनःशेपाख्यानविधिर्वाक्यशेषेनायोक्तारंनविविदुर्विशसितारंनविविशसिष्यामी
दुरितिशामित्रकर्तृत्वेलामोहन्यामहयमपरंशतंददाहमेनंनियोक्ष्यामीतिमत्स्यमेपरंशतंदत्ताह
मेनंविशसिष्यामीतिचलोभात्प्रवृत्तश्चशामित्रेदोषाच्चगतेर्निंदायात्तन्निषेधःकल्पतोपघपि
चात्रनहिस्यादितिसामान्यनिषेधप्रत्तिजोस्वाधिकारिकःपराधिकारिकेणसामाख्यानिकेनब

४८ तत्त्वमात्रतयास्तित्विजः स्पृशताप्यवाधितः प्रवृत्तोऽस्ति। अतएव तृतीये शमिताच शब्दभेदादित्यधिक
48 रणे वार्तिककृतोक्तं अतएवाहिंस्यं निंदेतातित्तथापि विशेषनिषेधो दोषविशेषार्थत्वेनार्थवानेवे
ति॥ २६॥ तथा कश्चिन्निषेधविधिसरूपोऽर्थवादो यथा अयो रवल्वाहुरनडुति वै जर्तिला स्यगवेधुक
श्चेति दशमे ह्यनाडुतिरितिनिंदया निषेधकल्पनानर्थक्यं पदापिल्यानहि निंदा निंद्यं निंदितुं प्रवर्तते
अपितु विधेयं स्तोतुमिति शास्त्रांतराधिकरणे प्रसंगादुक्तेनन्यायेनयन्यपसाऽध्याहोत्रं जुहोतीतिपये
विधिशेषत्वान्न निषेधकल्पनेति सिद्धांतितं॥ २७॥ संदिग्धार्थपदाननीर्णायकोऽर्थवादो यथा सारस्वतौ
वत इति विधौ एतद्वैदैव्यं मिथुनं यत्सरस्वती सरस्वांश्चेति अत्र सरस्वान्देवता यस्यासौ सारस्वतः अ
परोऽपि तथा ततः सारस्वतश्च सारश्च सारस्वतौ उत सरस्वती देवता यस्येत्येकः तद्धित अपरस्तु सरस्वती दे
वता यस्येति तद्धितस्ततस्तयोरेकशेष इति संदिग्धे स्त्रीपुंसदेवत्य एवापनं मिथुनद्वयदेवत्य इति निर्णायको
ऽर्थवादाद्भवतीति तदेतत्सर्वं च मम सुख्यक्रमेण वांगानामित्यधिकरणे सुक्तं॥ २८॥ तथा कश्चित्सं ४८

त्रिन्धोर्थे शक्तिग्राहकार्थवादो यथा पवमति मिरङ्गिरौदुवरीप्रोद्धतीति विधेर्वाक्यशेषः पदावाग्रन्याश्रे
षधयो ऽज्ञापंतेऽश्वैवैते मोदमाना इवोत्तिष्ठन्तीति तदुक्तं शास्त्रस्याघातस्विमित्रत्वादित्यधिकरणे ॥ २९ ॥
गतथा कश्चिदुपमानार्थवादः यथा यथावै श्येनो निपत्यादत्ते एवमयं द्विषतं भ्रातृव्यं निपत्यादत्ते यम
भिचरतीति श्येनेनेति उक्तं तद्व्यपदेशं चेत्याधिकरणे नामधेयपादे ॥ ३० ॥ इति श्रीमत्पदवाक्यप्रमाण
पारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते मीमांसा
बालप्रकाशे कलार्थवादनिरूपणे अथ मंत्रभेदा निरूप्यंते ॥ मंत्रोपि तावस्त्रिविधः ऋग्यजुः सामेति
एषां लक्षणानि क्रमेण लक्ष्यैर्वोक्तानि तेषामृग्यत्रार्थवशेन पादव्यवस्था गीतिषु सामाख्या ॥ शेषे यजुः
शब्द इति ॥ निगदास्तु यजुर्भेदा एवेत्युक्तं भावार्थपादे यजूंषि वा तद्रूपत्वादिति तिचाग्नीदग्नीन्विहरे
त्यादयः परसंबोधनरूपाः अतः परं तच्चोदकेषु मंत्राख्येतदन्यस्त्वे शेषे ब्राह्मणशब्द इत्युक्तं च सूत्रे भाष्ये
वमदर्शिताश्चाष्टाविंशतिर्मंत्रभेदाउच्यंते तत्रानेकेषां बहूनामर्थप्रयुक्तत्वात्समवस्य संभवः ॥ तत्रे सर्पेण

तुःस्वर्पेपोरपि वर्णेधर्मो दाम्नादिरूपत्वेन सामस्त्यसंभवः। अनुषंगस्यापि अप्सरोणे पुरस्तन्वनुषंग इति भाष्या
दर्थप्रयुक्तत्वात्सामस्त्यसंभवः। अतः सर्वेपि वल्पमाभेदाः ऋग्यजुर्मंत्रगतत्वेन द्विगुणा ज्ञेयाः। अत एव
भाष्यकारेण काचिदृग्त्राः काचिद्यजुर्मंत्रा उदाहृताः। तत्र भाष्योक्तास्तावदष्टाविंशति भेदाः एवं कश्चि
त्विधायको मंत्रः पृणीयादिन्नाधमानाय तव्यानिति। नाधयो व्यायांतव्या भोज्यादार्थानिति सोमेश्व
रः। तथा कश्चिद्विधायको यजुर्मंत्रः यथा वसंतापकर्पिंजलानालभत इति। एवं विधायकत्वेनत्र ऋ
चं यजुश्चेति द्विविधमुदाहरणं वेदस्तो भाष्यकृतोऽपि सर्वत्र द्वैविध्यमभिमतं तेन यत्र ऋङ्मंत्र उ
दाहृतस्तत्र यजुषोऽप्युपलक्षणं यत्र च यजुर्मंत्र उदाहृतस्तत्र ऋचमपत्रसमाप्युपलक्षणं तद्वि दर्शितो क
श्चिदस्त्यंतो मंत्रं यथा मेधामीति तथा कश्चित्स्तातो मंत्रः यथा इषे त्वेति तथा कश्चिदाशीर्मंत्रः यथा अ
पुर्दी असीति तथा कश्चित्स्तुतिरूपो मंत्रः यथा अग्निर्मूर्धेति। तथा कश्चित्संख्यामात्रः यथा एको मम एका
चतस्रेति। तथा कश्चित्प्रलपितमंत्रं यथा अरूते इंद्र पिंगले कुले रिवेति डुलिः कच्छपी। तथा कश्चिद

रिदेवनमंत्रः यथा वेश्चिकेवालिकेनमानयति कश्चिन्नसमसस्त्यश्वकः सुभद्रिकां कांपीलवासिनीमिति सुभ
ल्याणरूपां कांपीलदेशवासिनीं कश्चिन्नयति कुत्सितोऽश्वः स्वपितीति सोयो पाः परिदेवनं तथा कश्चि
त्प्रेषमंत्रः यथा ग्रावाणश्च विहरेति तथा कश्चिदन्वेषणमंत्रः यथा कोसि कतमोसि कस्यासि कोनामासि
यस्य ते नामामन्महि त्वां सोमेनातीतृपाम इति तथा कश्चित्प्रश्नमंत्रः यथा पृच्छामि त्वा परमंतं पृथिव्या
इति अश्वमेधे ब्रह्मोद्ये होत्रादीनां चतुर्णां महर्त्विजां यजमानं प्रति प्रश्नोयं तथा कश्चिदाख्यानमंत्र
यथा इयं वेदिः परोऽंतः पृथिव्या इति तित्रैव यजमानस्य प्रत्युत्तर इमिदं तथा कश्चिदनुषंगमंत्रः स
तु द्विविधः पुरस्तादनुषंगः परस्तादनुषंगश्चेति तत्राद्यो यथा या ते अग्ने रयाशया तनूर्वर्षिष्ठा ग
ह्वरेष्ठा उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा या ते अग्ने रजाशया या ते अग्ने हराशयेति पूर्वो
क्तापरार्द्धे परस्य समानमाग्रयसोमयचैकवपागत्रयमेकोपसन्नथा विधास्ति स्वउपसदस्त्रिदिनं जो
तिष्टोम तत्राद्यायामग्निमनिकमित्यस्याः क्रमेण ह समुपो भूतमिदं मंत्रत्रयं एतदर्थो ब्राह्मणे अथ

५० 50

नमियासेह धाउ ग्रंवचः एनश्चवैरहत्यंवत्वेषंवच इति एनःउपपापवैरहत्यंमाहा पापं परस्तादनुषंगो॥

यथा चित्तं तिस्त्वा पुनातु वाक्यतिस्त्वा पुनातु देवास्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य

रस्मीभिरिति। अडंग्रे प्यनुषंगउक्तो मंत्राधिकरणे अम्यक्षात इंद्र आशिरस्मे इत्युचि उपरितन्याम सवित्वेत

न इंद्रतरपिंदा इति श्रूयते तदेवास्यामृच्यनुषंगेण इंद्र त्वा मिति। अपंच अन्ह्येयप्यत्वयात्पुरस्तात्परस्ताद

नुषंगयोरुभयोरप्युदाहरणं। तथा कश्चित्त्रयोगेरूपो मंत्रः सद्देधा त्रै स्वयवाश्चात्युः स्वपंवां ज्ञातंत्राघत्र

उत्रेयथा अग्नेमूलमहां असिपई मादेवपुंजनेइयेपवर्हिरासदमिति। चामुः स्वर्पवान्नुइंग्रत्रेयथाग्

निमालेपुरोहितमित्यादिः लेतमित्येतयोः प्रचयत्वात। त्रैस्वर्पवान्यजुर्मंत्रो यथा इषेत्वोर्जेस्वत्यादिः चा

तुः स्वर्पवान्यजुर्मंत्रो यथा देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण इति आम्नयकारस्य प्रचयत्वात

तथा कश्चित्सामर्ष्यवान्मंत्रः यथा देवस्य त्वेति निर्वापप्रकाशनसामर्थ्यो मंत्रः तथा कश्चिद्दसिमर्थ्यो

मंत्रः यथा इह श्वासिबंधश्चासीति तथा कश्चित्त्वामध्यो मंत्रः यथा नत्वा पामि ब्रह्मणा वंदमान इति॥ ५०

तथा कश्चिदिति कारण वदुले मंत्रः यथा इति वा इति मे मन इति। तथा कश्चिदित्याहोत्यनि वद्धः य
थामगं मह्रात्याहेति। तथा कश्चिदाख्यायिकारूपे मंत्रः यथा तुग्रो ह भुज्युमश्विनोदमेघे रयिं न क
श्चिन्ममृवां अवाहाः। तमूहथुर्नौभिरात्मन्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिरिति। तदर्थः। हे अश्वि
नौ तुग्रो नाम कश्चिद्राजा भुज्युं नाम स्वपुत्रं उदमेघे समुद्रे अवाहाः वाहयामास तत्रिडाति डेभवतीति प्रण
मभुरूपार्थे मध्यमः। प्रसिद्धार्थो हकारः नकार इवार्थेः यथा कश्चिन्ममृवान्सुमूर्षुः रयिं द्रव्यं समुद्रे वाहय
तीति हृष्यंतः। तं भुज्युमात्मन्वतीभिरंतरिक्षप्रुद्भिराकाशगामिनीभिरपोदकाभिर्निर्जलाभिर्नौभिर्यु
वामूहथुरुत्तारयामासथुरिति। तथा कश्चिद्धेतुविधिर्मंत्रः यथा इंद्र वो चाभुशंतीति हारीतिश्चत्रहि
इंद्र वायू इमे सुता उप प्रयोभिरागतमिति। पूर्वार्धे चेहे इंद्र वायू इमे सोमा अभिषुतास्तान् यैरपेज्यमाना
पदैः सह युवामुपागतमित्युक्ते यस्मादिदं वः सोमा वां युवामुशंतीच्छंतीति हेतुः। अत्र चाचेतना
नां सोमानामिच्छायोगाद्देवतायाश्च विग्रहादि निरासेनागमनायोगादिच्छयातद्देशेन विधिर्लक्ष्यां

५१ 51 तेष्वागमनेन च तत्कार्यं भूतं भवत्येवं तेनाप्यस्य दर्शनं हेतत्सादृश्याद्वा वारणान्तं भस्मसात्करणं दाह
रूपं लब्धातोऽत तस्य पर्यायदेव तेन हेतुना विहितं तदस्मै कार्यमिति हरणं तत्र च वचनं कल्पनया हेतुवि
धिर्न ह्यत्रानुयाज्ञानं यजमानं भवतीति परमार्थहेतुवादिति भाष्यतात्पर्यमनुज्ञायते तथा कश्चिन्निर्वचन
योगः मंत्रः यथा यत्त्वा पितावरुणेन तेताः शीभं समवलाता तदापो दिद्धो वोयतीस्तस्मादापो अनुस्यने
ति । अत्र हि हे आपो यस्मात्तथा पूर्वं वरुणेन प्रेषिताः सत्यः शीभं स्वछंदं समवलात तव लानमकुर्वतत
यति कुर्वतावीयुष्यानिंद्र आप्नोत्तस्मादनु अनन्तरं आपः स्थान भवततन्न पनपनायेति लोके राम
धमनुरूपवचन वचनस्य पनादेशः तेनापशाब्द निर्वचनमिदं तथा कश्चिन्निदामंत्रः यथा मोघमन्न
विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी
ति । अत्र हि यः केवल एकाकी अन्निन तर्यमशाही पलक्षितं देवगणं सखायं मनुष्यगणं वा पोषयति स
मंदप्रज्ञो निष्फलमन्नं लभते प्रस्तुतं चोराघुपदं वेहतुत्वाद्घ कोऽपि एव भवति केवलं पापस्य संभवति ५१

सत्यमेतद्ब्रवीमीतीक्षपणानिदा॥ तथा कश्चित्संशयो मंत्रः यथा तिरश्चीनो विततो रश्मिरेषामधः
स्विदासीदुपरिस्विदासीदिदुपरिस्विदासीदिति च विचार्यमाणार्थयोर्काकायोष्टेः क्रमेणोदात्तायाअनुदात्त
मश्च विचार्यमाणानामुपरिस्विदासीदितिवेस्त्रात्स्यां विहितात्प्लुतात्संशयो गम्यते तथा कश्चित्स्तरस्तु
तिरूपो मंत्रः यथा चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयु
ता ददददिति॥ अत्र हि हे राजका राजानः चित्रो नाम राजा इदिति निश्चये स एव सरस्वतीमनु तद्देशे यके
न्यकेपस्मिन्कस्मिंश्चिदन्यस्मिन्देशे गवां सहस्रमयुतानि ददद्दिद्दावेव वृष्ट्या ततनत्तत च पर्जन्य इव
हि प्रसिद्धे॥ एवमेककर्तृको पाख्यानरूपायरस्तुतिरेषा॥ तथा कश्चित्स्तुराकल्परूपो मंत्रः यथा यज्ञेन
यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवा
इति॥ अत्र हि यज्ञेन ज्योतिष्टोमादिना विष्णुर्वै यज्ञ इति श्रुतेर्यज्ञं विष्णुं देवा अयजंत तानि धर्माणि
पुण्यानि साद्धर्ममस्त्रिया पुण्यश्रेयसी इत्यमरः॥ प्रथमान्यासन्॥ हेति प्रसिद्धौ॥ ते दोवा महिमानो मह

५२ स्तैवेत नाकं स्वर्गं सचेतत्रागमन्। यत्र नाके पूर्वे पुराणाः साध्या नाम देवाः सन्तीति वडूकर्तृकोप
52 ख्यानरूपः पुराकल्पः॥ एतेष्वपि सामर्थ्यादि द्वादशभेदेषु यत्र ऋगुदाहृता तत्र यजुरप्युदाहार्य
यत्र यजुरुदाहृतं तत्र ऋगप्युदाहार्येति द्वादशगुणेन चतुर्विंशतिर्भेदाः संभवंतीति भाष्याकृतात्र
स्ताविंशतिमंत्रभेदः॥ अत्र चापि भाष्यकारेण प्रायिकमिदं लक्षणमित्युक्तं॥ अतोऽन्ये मंत्रभेदायेऽस्य
चित्का चिच्चिरूपीताः भाष्यवार्तिककाराद्यैस्तान्सर्वान्निदध्महे तथाहि। पूर्वं हेतुविधिमंत्र उक्
:कश्चित्तु हेतुविधिसरूपो मंत्रः यथा द्वादशारं नहि तज्जरायेति॥ तथा हि तु विधिमंत्रवत्कश्चित्फ
लविधिमंत्रः स त्रिविधः ऐहामुत्रगामिफलविधिरैहलिगामिफलविधिरुभयगामिफलविधिश्चेति
तत्राद्यो यथा ममाग्रे वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम। मह्यं नमंतां [illegible] प्र
प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेति। तदिदं ऋत्विक्फलं करणे त्वर्थबलादित्यधिकरणे
तृतीय उक्तं। आमुष्मिकगामिफलविधिर्मंत्रो यथा अग्ना विष्णू मा वामवक्रमिषं विजिहाथां मा मा सं ५२

ताम्रमित्याहवनीयस्यापश्चादेशस्थस्याध्वर्योः स्तैवाधारार्थे नेत्रं तद्देशोल्लिक्रमणस्य करणमंत्रः। तत्क
ल्पितम संतापनरूपं फलमध्वर्युणामित्युक्तं तृतीये कर्मार्थं तु फलं तेषां स्वामिफलविधिनं प्रत्यक्षे
वत्वादित्यधिकरणे फलविक्फलंकरणं सर्वथंवत्वादित्यधिकरणापवादार्थे उभयगामिफलविधिर्मंत्रो
यथा उपरध्यपोहस्तौ प्रवेश्याध्वर्युरितरयोस्तयोः प्रवेशितहस्तं यजमानमाह किमत्रेति यजमान
आह भद्रमिति तत्रैवोमसहेत्यध्वर्युः प्रत्याहेति प्रतिवचनकरणत्वेन विनियुक्ते मंत्रे व्यपदेशाच्चेति स्
वोधिकरणापवादार्थे धिकरणे तृतीयेवस्थाते उभयगामिफलविधिर्मंत्रोयमिति। तथा कश्चि
त्फलविधिसरूपो मंत्रः यथा आयुर्दा अग्ने असि आयुर्मे देहीति दर्शपूर्णमासांते आहवनीयोपस्था
नार्थः। तृतीये हि मंत्राणां कर्मकरणत्वादित्यधिकरणे स्फले रुगविनियोगनकरणत्तया विनियोगा
भावान्न फलविधिः किंतु प्रधानफलमेव यजमानप्रोत्साहनाय प्रकाशयतीत्युक्तं। तथा कश्चिद्देव
ताविधिमंत्रः स च द्विविधः गुणभूतदेवताविधिप्रधानभूतदेवताविधिश्चेति। तत्राद्यो यथा ॥ समिधो

५३ समिधोग्न आत्मस्य व्यंत्विति समिदादिप्रयाजयाज्यामंत्रः डायाजेषु हि मांत्रवर्णिको देवतविधिर्नेष्टमेप्रय
जपेतिचेदित्यधिकरणे द्वितीयपादे देवताविधिसामर्थ्यं निरासतत्वरकन्यायेन समिदादिपदानाना
53 मतासाधनार्थमुक्तः । प्रधानभूतदेवताविधिर्मंत्रो यथा उत्तमप्रयाजमंत्र आज्यभागादिसुपद्म
णानामग्न्यादिदेवतानां प्रकाशकः स्वाहाग्निं स्वाहा सोममित्यादिः दशमे हि प्रयाजे च तन्न्यायत्वा
दित्यधिकरणे स्वाहाकारं यजतीति स्वाहाकारशब्दस्य द्वितीयांतत्वेन देवताविध्यसामर्थ्यान्मांत्रव
र्णिकदेवतास्मरणार्थोत्यः प्रयाजः स्वाहाशब्दस्तु स्वाहाग्निमित्यादिमंत्रसंबंधेन नामधेयमिति
संस्कारकमेतत्सिध्यर्थमुक्तं । तथा कश्चिद्देवताविधिसरूपो मंत्रः यथा पात्नीवतं गृह्णातीति पात्नी
वतग्रहाभ्यासे होत्रो मंत्रः ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रीं
श्च देवाननुष्वधमावह मादयस्वेति । अत्र हि तृतीये त्रिंशाद्व्यपरार्थत्वादित्यधिकरणे अग्राह्य पत्नी
वसजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहेत्यादिः एवं मंत्राश्चोदनायामश्रुतस्याप्यग्रे रिव होत्रे मंत्रोपस्थिर ५३

तामपिदेवतात्वंकल्प्यमितिएवंपक्षंकृत्वासिद्धंतितंइहापितद्गुद्देशेनात्यागेमादेपित्तत्वानुपत्तेर
ग्नेरेवदेवतात्वंइतरेत्वग्निदत्तेनकामंमाघंतुनतुदेवताइतिनदेवताविधिरितितथाकश्चिद्द्रव्यविधि
र्मंत्रःसद्विविधःगुणभूतद्रव्यविधिःप्रधानभूतद्रव्यविधिश्चेतितत्राद्योयथाग्रेतुदेवताइतिनदेवतावि
धिरितितथाकश्चिद्द्रव्यविधिर्मंत्रःसद्विविधःगुणभूतद्रव्यविधिःप्रधानभूतद्रव्यविधिश्चेतितत्राद्यो
यथाग्रेतुश्रमसघ्रब्राह्मणःप्रोद्ब्राह्मणंप्रयजमानस्येतियजमानशब्दस्ययोगीकृत्वाद्भवेद्द्रव्यविधिः।
प्रधानभूतद्रव्यविधिर्मंत्रोयथामहसोमेन्द्रमतेतुवषट्कारहोमस्यप्रतिपत्तित्वात्सोमस्याग्रेर्वीह
त्वानुवषट्करोतीतिविनियुक्तोमंत्रःसंस्कार्यसोमेद्रव्यविधिः।तथाकश्चिद्द्रव्यविधिसरूपोमं
त्रःयथाएषवपरिव्याणेविवृत्ताएषपरिव्यपतीतिविहितत्वात्करणकेवासोरूपद्रव्यविधिसरूपो
होत्रःक्रियमाणानुवादीपुवासुवासाःपरिवीतत्र्यागादितितथाकश्चिज्जातिविधिर्मंत्रःयथाच्छाग
स्यवपायामेदसोदसानुब्रूहीतितदेतत्तत्पशुंत्येतउक्तो।तथाकश्चिज्जातिविधिसरूपोमंत्रःयथा

54

र्हिर्देवसदनं दामीतिमंत्रोदामित्युक्तो लवनेनवर्हिः ॥ प्रायकः वर्हिर्लुनातीति विधिनैव वर्हिःसंस्कारकं लव
नेसंस्कार्यभूतवर्हिः प्राप्तेः तथा कश्चिद्गुणविधिर्मंत्रः पथादर्भैः स्तृणीतहरितैः सुपर्णैरिति मंत्रो वर्हिषि हवी
ष्यासादयतीति हविरासादनांगत्वेन विहिते वर्हिषि हारित्यगुणप्रकाशयत्नेन्यथानुपपत्त्या तं विधत्ते त्र्य
तएव नवमे ज्ञातिनैमित्तिकं पथास्थानमित्याधिकरणे सोऽहं चरुं निर्वपाम्यै श्राकामइति कर्मणि पाण्डर
काणि वेहीषि भवंतीति विहितेषु संपुडराकेषु प्राप्ते तेहारित्यगुणप्रकाशके पूर्वोक्ते मंत्रेति दिष्टे हरित
पदस्थाने रक्तेपदमूहितव्यमित्युक्तं । अस्मदेवामित्युक्तं तरवैदिकभाष्यकारादिल्लेखवादवैदिकामस्के
शोऽनादत्यः पुंडरीकं सितांभोजमिति । तथा कश्चिद्गुणविधिसरूपो मंत्रः पथा षड्विंशतिरस्य वंक्रयइति
। अत्र हि छागवंक्रीणां षड्विंशतिसंख्यास्वभावसिद्धा प्रकाश्यते न तु विधीयते । पार्श्वेपोरवद्यतीति विधि
नैव प्राप्तेः तथा कश्चित्क्रियाविधिर्मंत्रः यथा अश्विनोस्त्वा वाहुभ्यां सध्यासं हस्तवदसं त्वा सोमदेवसु चद्रा
अवरव्यषं मामेवाङ्गाभिमतिगाइति । एतेहि ग्रहणवेत्ताणसमया जरणप्रकाशकाः प्रकरणेनविनियु

क्तः। ग्रहणादानामनुष्ठानयोग्यानांस्वांगत्वासिध्यै विधिंकल्पयतीति तृतीये लिंगसमाख्याभ्यां मन्त्रार्थता
नुवाकस्येत्यधिकरणेउक्तं। तथाकश्चित्क्रियाविधिसरूपो मंत्रः। यथानतानशंतिनदभातितत्करोनास
मामित्रोव्यथिरादधर्षतीति। देवांश्चयाभिर्यजतेददातियाचज्योगित्ताभिःसचतेगोपतिःसहेति। द्वितीयेहि
विधिमंत्रयोरैक्यापकार्य्यमेकशाख्यादित्यधिकरणे यजतेददातीत्याख्यातविशेषादस्यापिमंत्रस्यपशुनायजे
तहिरण्यमात्रेयायददातीतिवधांतरविधित्वंएवंपक्षंकृत्वापश्चाद्धुपवंघात्तक्तश्चयोरेवयागदानयोरनु
वादइतिसिद्धांतितं॥ तथाकश्चिन्निषेधविधिर्मंत्रः यथान्वश्याराततन्र्भवतिरुषतीपापयस्तुया। पतिदोषा
क्तेनिषेधःकल्प्यते। तथाकश्चित्स्विषेधविधिसरूपोमंत्रः यथावनिष्ठुमस्यमाएविष्टोरूपकंमन्यमानाइति
नवमेहिवनुष्ठुसंनिधानादुरूकेणावपाभिधानामित्यधिकरणेचनिष्ठोर्लवनंप्रतिषिध्यतेइतिएवंपक्षं
कृतःसिद्धांतेचनतावद्वनिष्ठोर्लवितव्यस्यसतोलवनंप्राप्तंप्रतितिषेद्धमितिनिरमं। तथाकश्चिन्निमि
त्तविधिरूपमंत्रः यथावाजसनेयिनामतेपत्यश्रुर्मामुमरुतोरोचापङ्किराहतःअग्निर्मातस्मादेनसोविश्वा
न्मुंचत्वंहसइतिसंज्ञपनहोममंत्रः। सहोमःपशोमायुकरणादेोनिमित्तेएवभवतीतिनोमित्तिकएवेतिव

जसनेयिनांमते।मीमांसकानांतुमतेनित्यएवमायुकरणाधभावेपिकार्यइतिषष्ठेतथामैत्तेषेषाष्ठादमसंह्न
ष्ठहोमहेषमित्यधिकरणेएवंजातीयकेषुनित्यत्वोक्तेः।तेनमीमांसकमतेनिमित्तविधिसरूपस्यैवेदमुदाहर
णंनिमित्तविधिमंत्रोदाहरणंनास्त्येवेति।तथाकश्चित्सादृश्यविधिसरूपोमंत्रः।यथाशेषेनमस्यवक्तःकृ
णुतादिति।नवमेहिशेषेनप्पलाकश्रपेत्यधिकरणेवक्तःसःकर्तनादिनाशेषेनसादृश्यंकर्तव्यमित्यने
नमंत्रेणान्यथानुपपन्नाकल्पितोविधिर्विधत्तइतिपूर्वपक्षंकृत्वाऽत्रदृष्टार्थताप्रसंगात्कर्तनेनैचव
तृप्तमेवविकल्पादविर्विनाशापत्तेः।साकल्यमेवाचप्रकाशपदृष्टार्थत्वादितिसिद्धांतितं।तस्यैतेपितत्रतत्रवि
ति।शामंत्रभेदाउक्ताद्वाविंशतिसंख्याः।भूयोपिऋग्यजुषभेदेनद्विगुणाः।संतश्चतुश्चत्वारिंशत्।वेदोक्ताश्च
ष्टाविंशतिरपिऋग्यजुषभेदेनषट्पंचाशदितिसर्वसंकलनेशतंभेदाःसंपन्नाः।पुनरप्यङंत्राणां
चतुर्दशछंदःप्रयुक्ताश्चतुर्दशभेदाः।गायत्रीउष्णिकःअनुष्टुप्बृहतीपंक्तिः।त्रिष्टुप्।जगती।अति
जगती।शाक्करी।अतिशक्करी।अष्टिः।अत्यष्टिः।धृतिः।अतिधृतिरिति।तत्रगायत्र्याश्चतुर्विंशत्यक्षरा

ततउत्तरोत्तरंचतुरक्षरचतुरक्षरवृध्याउष्णिगाद्याः।तेनोष्णिहा।२८।अनुष्टुभि।३२।बृहत्यां।३६।।
पङ्क्तौ।।४०।।त्रिष्टुभ।४४।।जगत्यां।४८।।चअतिजगत्यां।५२।।शक्वर्यां।५६।।अतिशक्वर्यां।६०।।अष्ट्यां।।६८।।धृत्यां
७२।।अतिधृत्यां।७६।।तंत्रापिसर्वानुक्रमण्यांकृतागायत्र्यादीनामाधानांसप्तानांजगत्यंतानांभेदानामवांत
तभेदान्अपिप्रत्येकमुक्ताः।तद्यथा।गायत्र्यानवभेदाः।गायत्री१पदपङ्क्तिः२।उष्णिगार्भा३पादनिचृत्त।४।अति
निचृता५यवमध्या६वर्धमाना।७प्रतिष्ठा८ह्रसीयसी९इति।उष्णिहोष्टौभेदाः।उष्णिक्१पुरउष्णिक्२क
कुप३ककुम्न्यंकुशिरा४तनुशिरा५पिपीलिकमध्या६अनुष्टुब्गर्भा७उष्णिगेव८इति।अनुष्टुभःसप्त
भेदाः।अनुष्टुप१महापदपङ्क्तिः।२।कृतिः३पिपीलिकमध्या४काविराट्५नष्टरूपी६विराट्७इति
बृहत्यानवभेदाः।बृहती।२।पुरस्ताद्बृहती।२।न्यंकुसारिणी३उपरिष्टाद्बृहती४विष्टारबृहतीपङ्क्ति
र्ध्वबृहती६पिपीलिकमध्याविषमपदा८बृहत्येव९इति।पङ्क्तेरष्टौभेदाः।पङ्क्तिः१।विराट्२।सतो
बृहती३विपरीता४प्रस्तारपङ्क्तिः५विष्टारपङ्क्तिः६आस्तारपङ्क्तिः७संस्तारपङ्क्तिरिति।त्रिष्टुभोदश

५६

56

भेदाः। त्रिपाद्यभिसारिणी २ विराट्स्थाना ३ विराट्रूपा ४ पुरस्ताज्ज्योतिः ५ मध्येज्योतिः ६ उपरिष्टा-
ज्ज्योतिः ७ महाबृहती ८ यवमध्या ९ पंक्त्युत्तरेति १० जगत्यास्त्रयो भेदाः। जगती १ महितोबृहती २ महापंक्ति-
३ इति। तदेवमेते आद्यानां गायत्र्यादीनां जगत्यंतानां सप्तानां भेदानां पादविशेषप्रयुक्ताश्चतुः पंचाशत्स-
पि र्वे मिलित्वा भेदाः सिद्धाः। एतेपि सर्वे प्रत्येकं चतुर्विधाः एकेनाक्षरेण न्यूना निचृद्गायत्र्याद्याः तावतैवाधि-
का भुरिग्गायत्र्याद्याः। द्वाभ्यामक्षराभ्यां न्यूना विराड्गायत्र्याद्याः द्वाभ्यामधिकाः स्वराड्गायत्र्याद्या इति। त-
देवमेते श्चतुर्भिर्भेदैः प्रत्येकं भिन्नाः पूर्वोक्ताश्चतुः पंचाशद्भेदाः षोडशोत्तरं द्विशतं संपन्नाः। अतिज-
गत्यादिभिस्तद्भेदैः सप्तभिर्भेदैः सहितास्त्रयोविंशत्यधिकं द्विशतं सिद्धा इति कात्यायनानुक्रमण्यां ग-
यत्र्यादेस्तु लक्षणं ज्ञेयं तद्वृत्तितः अतिजगत्यादि सर्वेषां होदाहरणानि तु॥ ॥ एवं छन्दसां गणाः पू-
र्वोक्तैः पंचाशद्भेदैः सह द्विशतं त्रिसप्ततिश्च भेदा उक्ताः। यजुर्मंत्राणां तु पंचाशदेव भेदाः एवमुक्ताः राम
पुनस्तेषामष्टाष्टमं त्र्यवच्छेदः प्रयुक्ता भेदाः संति। याजुषानुक्रमण्यां तु कात्यानुसारिणः प्रामाण्य ५६

मिवनांगीकुर्वंतियद्यपिग्रामणएमन्यंतेदेवयाद्धिकादयस्तेपियजुषामभिपताछूरत्वादेकेषांछंदोनीवि
षत्तइतिपाजुषानुक्रमणीग्रंथमेवंव्याचक्षतेषडधिकेत्ताक्षरपर्यंतंछंदांसिसंत्येवतदधिकाक्षराणांतु
पजुषांछंदोनास्तीतिपजुषांछंदःत्वइववश्यमाणंमुपिंगलसूत्रमेवातत्रहि।अथलौकिकमित्यतः
प्राक्छंदः।गायत्रीदैव्येकाआसुरीपंचदशःप्राजापत्याष्टौयजुषांषट्सामांद्विः।ऋचांत्रिःद्वौद्वौसाम्नांव
र्धेतात्रीस्त्रीनृचांचतुरश्चतुरःप्राजापत्यापाःऐकैकंशेषे।जत्याद्यासुरी।तास्मिस्मिनानुष्टुब्बृहतीपंक्तित्रिष्टु
ब्जगत्यःतिस्रस्तिस्रःसनास्त्येकैकाब्राह्म्यः।प्रागयजुषामार्ष्यइतिपादइत्याधिकारात्प्राक्षोडशभिःसूत्रैरपे
वद्धातिएकाद्वरादारभ्यएकैकाक्षरवृध्यासप्तगायत्र्यादीनजगत्यंतानिछंदांसिदैवीआसुरीप्राजापत्याय
जुषांसामोपपादाऽऋगुपब्राह्म्याआर्षीचेतिप्रत्येकमष्टभेदभिन्नान्युक्तानिधियाअत्रगायत्रीतान्तु
ष्णिगितिसंज्ञाभ्यांसप्तानांछंदसामुद्देशः।दैव्येकैकमित्यादिषट्सूत्रैर्दैव्यादीनांषसांगायत्रीदीचाष्टा
गंनाषट्लक्षणान्युक्तानि।तत्रसाम्नांद्विरितिसूत्रेणसामगायत्र्याःपूर्वसूत्रोक्तषद्विरितिद्वेगुण्यात्द्वादश

स्मृतेतिस्मा।एवंत्रिरितिषट्कंचिंत्योक्ता।का।गायत्र्यामष्टादशाक्षरासा।।एवंदेव्यादीनांषड्गायत्रीणांलक्षणमु
क्तानिततउष्णिगादिषुजगत्यंतासुकिंपदक्षरवृद्धिरित्यपेक्षायांद्वौद्वौसाम्नांवर्धेतेतिसूत्रेत्रयेणैकमात्सा
मगायत्रीतोऋग्गायत्रीतःप्राजापत्यंतागायत्रीतश्चसाम्नोष्णिगादिषुऋगुष्णिगादिषुप्राजापत्योष्णिगादिषु
चद्वित्रिचतुरक्षरवृद्धिःस्मृताःततएकैकंशेषद्वितिसूत्रेणप्रोषेजक्रवद्यमाणाह्वृद्धिर्ह्रासाविषयेदैवाःष्णि
गादिषुयाजुषाषुचोष्णिगादिषुक्रमेणदैव्यागायत्रीतोयाजुष्याश्चगायत्रीतएकैकंवर्धेतदैव्याएकाक्षरस
पागायत्रीतएकाक्षरवृद्धाद्व्यक्षरादैव्युष्णिकततएकाक्षरवृद्धात्र्यक्षरादैव्यनुष्टुबित्यादिजगतीपर्यंतंएवमेव
षडक्षरायायाजुष्यागायत्र्याएकाक्षरवृद्धासप्ताक्षरायाजुष्युष्णिकाततोप्येकवृद्ध्याष्टाक्षरायाजुष्यनुष्टुबि
त्यादिजगत्यंतंततोजह्यादासुरीत्यनेनासुर्यागायत्रीतश्चासुर्याद्युष्णिगादिषुउत्तरोत्तरमेकैकाक्षरह
निस्मृतातननस्तिस्वस्तिस्वइतिसूत्रेणगायत्रीत्येवंसतामस्तिसायजुर्गायत्र्यात्रगायत्रीत्यनंतरःपूर्वोक्तासि
स्तोमिलितायाःषंत्यक्षराणितावंतिब्राह्म्यागायत्र्यायाइत्युक्तंतेनयजुर्गायत्र्याःषट्साम्नगायत्र्याद्वादशऋग्गा

यज्ञ्याअष्टादशेत्येवंमिलित्वाषट्त्रिंशदक्षराणीतावत्तीब्राह्मीगायत्रीएवंयजुरुष्णिहःसप्तसाम्नोष्णि
हश्चतुर्दशऋगुष्णिहएकविंशतिरित्येवंमिलित्वाद्विचत्वारिंशदक्षराणिवतीब्राह्मीउष्णिगित्यादिये
ज्यंजगतीपर्यंतंततःप्राग्यजुषामितिसूत्रेयाजुष्यागायत्र्यादेःप्राक्पास्तिस्वस्तिस्त्वःसमाम्नःदैवीगाय
त्र्यासुरीगायत्रीप्राजापत्यागायत्रीत्याषस्तामिलितायावंत्यक्षराणितावत्यार्षीगायत्र्याधाईत्युक्ते॥
तेनदैव्यागायत्र्याएकमासुर्यागायत्र्याःपंचदशप्राजापत्यायागायत्र्याअष्टवितेत्येवंमिलित्वाचतुर्विंशतिरक्ष
राणीतावतीआर्षीगायत्रीएवंदैव्याउष्णिहोद्वेआसुर्याउष्णिहश्च
तुर्दशप्राजापत्यायाउष्णिहोद्वादशेत्येवंमिलित्वाष्टाविंशतिरक्ष
राणीतावतीआर्षीउष्णिगित्यादिजगतीपर्यंतंयोज्यंएवंषोडश
निःसूत्रैःपिंगलेनगायत्र्यादिनाजगत्यंतानिसप्तछंदांसिप्रत्येकं
दैव्यासुर्यादिषड्भेदभिन्नान्युक्तानितेनैतेषट्पंचाशद्भेदाएत
नित्र्याणियजुर्विषयाण्येवान्यान्युक्तानिलोकविषयत्वा

५८ उक्तं च चतुःपादादि गायत्र्यादि चतुःपादादि गायत्र्यादि चतुर्दशछन्दसामेवानुक्रमण्युक्तानां प्रयोगस्या
स्माभिः सर्वमुक्तत्वादेतेषां सूत्राणां निर्विषयत्वैव स्यात्। एवमन्यान्यपि अङ्गीत्र विषयचतुर्दशछन्दांसि
त्यानि। अथ लौकिकमित्यतः प्रागेव पंचशछन्दांसि चतुरुत्तरशतादारात्कृतिति चतुरक्षरचतुरहान्याः
चत्वारिंशदक्षरजगतीपर्यन्तेपिंगलेन चतुःशतमुक्तमिति चतुरस्त्रजे दुत्कृतेरित्यादिसूत्रसप्तकेनोक्ता
नि। तानि च यजुर्मैत्र विषयाण्येवान्यथास्मत्सूत्रेष्वनुक्रमण्यामतिधृत्यंतानां चतुर्दशानामेव छंद
सामुक्तत्वाल्लौकिकाधिकाराच्च सर्वमुक्तत्वेन लौकिकविषयत्वाभावात्सूत्रसप्तकोक्तानां पंचदशानां जग
त्यादीनामुत्कृतिपर्यन्तानां निर्विषयत्वैव स्यादिति। अत एव हलायुधेनाथ लौकिकमिति सूत्रे व्याख्यातं
सर्वेषां छन्दसां वैदिकत्वमेवेति। एवं च षोडशसूत्रैः सर्वमुक्तानि षट्पंचाशदेभिः सप्तसूत्रैरुक्तानि पं
चदशैत्येवं मिलित्वा एकसप्ततिश्छन्दांसि पञ्चषष्मुक्तानि एतान्यपि प्रत्येकं अङ्गप्रत्यक्षचतुर्विधानि एवं
नाक्षरेणान्यूनेन निचृत्। तावतैवाधिकं भुरिक्। द्वाभ्यां न्यूनं विराट्। द्वाभ्यामधिकं स्वराडिति। तदेवमेते श्रुत ५८

58

भिन्नैर्भेदैः प्रत्येकं भिन्नाः सर्वोत्कृष्टाः एकसप्ततिभेदाश्चतुरशीत्यधिकं द्विशतं भवंतीति ते नत्कृतिरेवैकात्यु
धिकाश्चतुरिके। त्वराधिकास्वराडिति षडधिकशतात्स्वरपर्यंतं पञ्चषामपिछंदांसि संतीति तदधिकाक्षरा
त्तु हेतायन्तद्द न स्यतिमिदानीं यजुषाम नियताक्षरत्वात्तच्छंदो नास्तीति सिद्धं एवं मन्त्राणां यजुर्मंत्राणां
भेदा उक्ताः अथ साममंत्राणां गीतिमात्ररूपत्वेन पद्यपि अक्षरसंख्याविशेषरूपछंदः प्रयुक्ता भेदा न संभवंति
तथापि स्वरूपत एव भेदाः संति ते च सामभेदा योनिग्रंथे उत्पन्नास्तत्र हेतवङ्गेयाः चतुःत्वाद्बहुविस्तरभियेहे
नोच्यंते॥ ॥इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्री
मन्नारायणात्मज महेशाकरकृते मीमांसाबालप्रकाशे मंत्रभेदनिरूपणं अथ मंत्रप्रामाण्यं॥ मंत्रा
णां पदार्थत्वेन प्रामाण्यं वाक्यार्थपदार्थानां प्रामाण्यमुपगमादिति पार्थसारथिमिश्राः शास्त्रदीपिकाया
माहुः तस्यार्थः। तर्कपादे उत्पत्तौ चावचनाः स्युरिति सूत्रे आचार्यैरत्राभिधीयते पदस्य प्रस्तिमूलांतरत्वतः।
पदार्थानां तु मूलत्वमिष्टं तद्भावभावत इति वाक्यार्थप्रतीतौ पदार्थानां कारणत्वमुक्तं। दर्शपूर्णमासादि

५९

59

प्रयोगविधिषुश्रुतिलिंगादिविनियोज्या मंत्राः पदार्थत्वेन प्रविष्टावाक्यैकवाक्यतैयेसिमंत्रविशिष्टंदर्श
पूर्णमासादिभावनां विदधते । महावाक्यस्य दर्शपूर्णमासादिप्रयोगविधेर्महावाक्यार्थे पदार्थभूता मं
त्राः प्रमाणं नावेलमंत इति गुरुवरणस्तु एवं सति ब्राह्मणादिवत्पदार्थविधये वैषां प्रामाण्यं स्यान्नेष्ट
विधिपेति दूषयित्वा स्मृतिवधाथार्थलक्षणमेवैषां प्रामाण्यमित्याहुः । भट्टसोमेश्वरस्तु अनधिगता
र्थगंतृत्वमप्याह अपादिस्मृतिलिंगत्वं मंत्राणां वक्ष्यते त्रयता देवाता कल्यनं पच्च मंत्रांतस्माधजिश्च
यः मंत्रावर्णाच्च यज्ञेतुः सर्वेपानं वदिष्यते मेदेहीत्यात्मावादित्वान्मंत्राणां याजमानता करणानां मा
र्त्विजत्वेप्यंगसाध्यफलस्य पातास्वामिगत्वां क्रियार्थस्य कर्तृगत्वं च वक्ष्यते । मंत्रक्रमानुरोधाद्ब्राह्म
णक्रमबाधनं । छागस्य निश्चयो यश्च पशाचूहश्च मंत्रगः । तदर्थपरता यो स्यात्संदेहे नैवान्यथा भवे
त् सर्वसाधारणत्वेन विचारस्य प्रयोजनं । कर्मकालेतु संधेयो मंत्रार्थोर्थपरत्वतः । इषेत्वादिषु चो रामः ॥
द्यापहित नद्यात्यादिपूर्वयो असावित्यादिशब्दस्य स्थाने यज्ञादिनाम च । सिद्धांते मंत्रलोपश्च प्रकाश्य ५९

मावह्रूप्यते। यथा चात्र प्रयोगस्तु केवलोऽर्थो विवक्षणे। यदि त्वर्थपरत्वेऽपि नैतावत्स्यात्प्रयोजनं। ततो धर्मप्रम
णत्वं मन्त्राणां नैव सिध्यति। लक्षणानां स्वरूपस्य प्रकाशकत्वे हि धर्मता। समाहितं। गता भावन्न कथं विस्मृता
ते। अथ सर्वसाधनत्वेन यद्यप्येतत्प्रकाश्यते। विधिप्राशस्त्यानुवादत्वान्न तथापि प्रमाणता। अथ सर्वसाधनत्वानुक्त
वनादे समाहितो आत्मनो गंत्वे बोधेन मंत्राप्रामाण्यमश्नुते। अश्नुतद्व्यथा यागादिकल्पनाच्च प्रमाणतेति।
तदत्रापि गुरुचरणैरुक्तं पाथ्यार्थ्यलक्षणे प्रमाणेपसमेश्वरोक्तं च सर्वमंत्रसाधारणे मंत्रार्थानुसंधानवि
षये प्रामाण्ये जपमंत्रे प्रब्यासिरूपो दोषोऽस्येव अविवक्षितार्थकमुच्चारणमात्रमेव हि जपः। तदुक्तं
ह्यादशो यत्र संतमप्यर्थमविवक्षित्वोच्चारणं मन्त्रार्थे क्रियते यथा वेस्मवामृचमन्दच्येतिस जपइति। त
त्र संतमपास्यापि प्राधान्यात्कश्चिदर्थो भावोऽपि प्रतीयते। तत्रे श्वासतः नुते। याथार्थ्येऽनुतोवानुसंधानमिति गुण
केचितं तत्र। जपमंत्राणामपि सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचस्तोमे पारिप्लवं शंसतीति
गुणगुणिसंबंधकीर्तनात्मके शाखे विनियोगाद्गुणगुणिसंबंधरूपेऽर्थे तात्पर्यं प्रस्येव चात्ते मतेषां मंत्रार्थानु

भवा॰टी॰
६०
60

संधानविषये प्रामाण्यं संभवत्येव । यागार्थो ऽर्थस्तु तद्यागप्रव्याप्तमेव । ननु तत्रापि लक्षणायां पार्थ्यो वाच्यमेव । अ
त एवार्थवादाधिकरणे धूमएवाग्नेर्दिवा ददृशे इत्यादिष्वपार्थ्येषु गुणवादस्त्वित्युपक्रम्य हृदरन्नूपस्वादिस्मा
दिस्तैरूपचारादेव पार्थ्यार्थ्यमुक्तमिति चेत् । न । तेषूदाहरणेषु संभवमात्रेण तदुक्तं न त्वयं नियमः । असतापि
गुणेनासतोपि गुणिनः स्तुतिस्तु छत्वत्रिसंभवात् । अत एवार्थवादाधिकरण एव प्रजापतिरात्मनो वपामुद
खिददित्यत्रासद्भूतविषयत्वेन भाष्योक्तां व्याख्यामेवं तु स्तुतित्वमेव हापयत इति दूषयित्वार्थवादाद्धिमू
लिकां सृष्टिप्रलयप्रतीतिमात्रेण सतोपि प्रजापतेरसताभि गुणेन स्तुरंगीकृता । तस्मात्स्तोत्रमन्त्रेषु पार्थ्या
र्थ्यमव्याप्तमेव । मात्रार्थस्तु संधानविषयं तु प्रामाण्यं संभवतीति तदेवयुक्तमिति सिद्धं । नन्वेवमपि सामम
णां कथं प्राप्तविषयत्वमप्रामाण्यमिति चेत् । उच्यते । तेषामप्राप्ततायामपि शब्दाभिव्यंजकत्वेन शब्दस्तु ग्राहकत्वा
च्छाब्दप्रमाजनकसामग्र्यन्तर्गतत्वेन शब्दप्रमाणान्तर्भावात् । सा चेयमप्यनुक्तेषु प्रजापतेर्हृदयादिषु विध्य
न संभवति । अस्ताग्रमपि व्याप्तोत्तानीदृशं पदार्थविधया प्रामाण्यं मिश्रैरुक्तं ।। तानि चान्यकाण्ड पंचत्रिंशात्स ६०

व२

मानि। अर्कं ग्रीवमेकं पंचात्तुगानमध्ये सामन्त्रेयं हाउ हो वा सामैकं। साध्यस्य मेकं। देवव्रतानि त्रीणि। क्षत्त
पयग्रीमेकं। प्रजापतेर्हृदयमेकं। ऋतुद्रुतमेकं। महादिवाकीर्त्यं निनवासवा मूतमेकं। कर्मेर्वैवनमेकं
आदित्यव्रात्मैकं। इंद्रो रोचनमेकं। इडानां संहारएकमिति। इति श्रीमत्पदधीकरमाणपारावारपारीणधुरीण
मीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्दनारायणात्मजमदशंकरकृतमीमांसाबालप्रकाशे मंत्रप्रमाण्य
त्तिरूपणं। अर्थाध्यभावनानिरूपणं। सैव हि सर्ववाक्येषु मीमांसकमते कारकविशिष्टरूपेण वाक्यार्थो नैय
यिककावत्संसर्गः। तदुक्तं तद्भूताधिकरणे। भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया। अनेकगुणजात्या
दिकारकार्था तु रंजते इति। अर्थैकत्वादेकं वाक्यमित्यत्राप्युक्तं। भावनैव च वाक्यार्थः स्वकारकविशेषितेति। संस
र्गो भेदश्च न वाक्यार्थ इत्युक्तं तत्रैव भाष्ये। भेदः संसर्गो वा वाक्यार्थ इति यद्युच्येत तत्र यथाप्यैकार्थतानस्यात् तव कूप
देषु नैवोपात्तत्वात्। भेदानां संसर्गाणां चवक्तृत्वादिति। तद्विवरणं तु वार्त्तिके कृतं। व्यक्तिपदार्थपक्षे सर्वव
क्षीनं गवादिपदैर्नैवोपात्तत्वात्तद्विशेषणोद्भवः श्रुत्यादिभिः कुतः। आदिव्यवच्छेदमात्रं कर्तव्यं तत्संसर्गः पदार्थ।

6)

न्तर्गतत्वान्न वाक्यार्थो भवतीति तदुपसर्जनस्तेषां भेदो गृह्यते। स च यथा शुक्लशब्देन गोशब्दस्य कृष्णादिभ्यो वि
धमानत्वाद्व्यवतिष्ठते। एवं शुक्लशब्दस्यापि गोशब्देनाश्वादिभ्यो व्यावर्तितस्य भवति व्यवच्छेधनीनात्वाच्च नास्य
कवाक्यत्वं प्रमाणं। भेदसामान्यग्रहणे चासर्ववाक्यार्थैकत्वप्रसंग इति। तथाकृतिपदार्थपक्षे शुक्लत्व
गोत्वयोः स्वरूपेणाभिहितयोः संनिधानादितरेतरानुपेजनादर्थासिद्धो भेदो न वाक्यार्थः स च गोत्वे शुक्ल
त्वे संसर्गः शुक्लत्वे च गोत्वसंसर्गः सामस्त्येनैकव्यक्त्युपसंहारादुपलभ्यत इति ना। यद्यपि च कथंचिद्वि
दे स एवेत्यन्यत्रापि संसर्ग इत्येकत्वं गम्यते तथापि चद्रूपदे येन प्रदेशेन पदे ह्युपसंक्रम्यते तेन तेन तत्सं
गरूपेणोपलब्धेरनेकत्वमिति। सा च भावना सर्वैः पदैः कारककविशिष्टत्वेन लक्ष्यते तत्रैकैकविशिष्टत्वेन
तन्नत्कारकपदैः क्रियापदेन तु सर्वकारकविशिष्टत्वेन। तदुक्तं भावार्थाधिकरणे यदि हि धर्मस्वरूपमभि
धीयते ततः किं पदेन पदेनोच्यत इति विनाशे युज्येत लाक्षणिकत्वं त्वयुक्त इति। वाक्यार्थो लक्षणो हि सर्वैश्चेतिनः
स्थितिरिति चालक्षणाश्च पदार्थधर्मो न पदधर्मः तदुक्तं। तन्नतल्लक्षितयल्लोकः क्रियासंबंधचोऽसर्वदेनेति। तच्छब्देन ६१

कृतिः परामृश्यते। तथा न्यायसुधायामपि अर्थवादाधिकरणे लिङः प्रवर्त्तनासामान्ये शक्तिमुपपाद्योक्तं प्रवर्त्तन
सामान्यस्य वाच्यत्वे भगवते तद्विशेषाकांक्षायां चोदनानां पुरुषधर्माणां वेदेनुपपत्तेस्तद्धितत्वत्वेन विशेषानन्त
मभिधेये न सामान्येन विधिप्रकरणे नियोगाख्यातत्वान्तद्दृति। अत्र च धात्वर्थप्रवर्तनासामान्यधर्म एव लक्षणेत्युक्ते
नश्चत्वधर्मे इति। संघे वाक्यार्थभूता भावनार्थभावनेति गीयते अर्थयत इत्यर्थः फलकामः पुरुषस्तद्वमल
ता। सा च प्रयत्नरूपैव रथो गच्छतीत्यादौ वलघ्नेति भट्टसोमेश्वरो भावार्थाधिकरणे प्रत्यपादयत। भिन्न
स्तु शापेण पुरुषधर्मः प्रयोजकव्यापाररूपैव तत्र सो रथो गच्छतीत्यादावपि गत्यनुकूल वक्र भ्रम्यादिरूप
स्सैवेति न लक्षणेति भावार्थाधिकरण एव प्रोचः। सा च किं करोति पचति पाकं करोतीति च करोति सामा
नाधिकरण्यात्सर्वाख्यातवाच्या। करोतिश्च किंचिदुत्पाद्य वस्त्वंतरविषयं प्रयोजकव्यापारमेवाहात्स्या
श्च पूर्वापरीभूतं सर्वकारकाद्युपयोगं क्रियारूपमाख्यातेनैवोच्यत इत्यनन्यारव्ययो भावार्थ इत्सु भयेप्यु
क्तः। पश्चात्कर्मत्वं द्वितीयावाच्यं अत एव घटः कर्मत्वमानयनं कृतिरित्यपोग्यं वाक्यमज्ञा। सर्वचेतनप्रवर्त

नात्मकविध्यपुरुषावपुरुषार्थरूपं भाव्यं विना विध्यनुपपत्तेः पुरुषार्थरूपं भाव्यमवलंबमानात्तस्यापि
ज्ञातकारणत्वाद निर्ज्ञाते इति कर्तव्यताकत्वाच्च स्वयं शास्त्रासच्छास्त्रोपदेशव कारणेति कर्तव्यते गृह्णाति
इत्यर्थभावनानिरूपणं एतामेव च भावनां साक्षाद्विषयीकुरुतो विधिप्रतिषेधौ तद्द्वारा तु तद्विशेष
णानि कारकाणि। तदुक्तं तद्भूताधिकरणे विशिष्टं भावनां प्रवृत्ति विधिनिषेधयोरिति। तत्र विधिः प्र
रणा नियोग इत्येकार्थाः। सैव च शाब्दभावनेत्युच्यते। लिङादिरूपशब्दधर्मत्वात्। तदुक्तं भावार्थाधि
करणे। अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते इति। अ
भिधीयतेनेनेत्यभिधा लिङादिः शब्दस्तद्धर्मो ऽभिधाभावना शब्दभावनेति यावत्। सा च सामान्यतो
विशेषतश्चैवं साध्या। स्वतन्त्रं पुरुषप्रवृत्तिर्द्विधा लोके दृश्यते क्वचित्स्वेष्टपार्थसुखार्थं प्रवर्तते क्व
चिदन्यप्रेरितः। आचार्यप्रेरितोऽहं गामानयामि न स्वेच्छयेति व्यवहारात्। अयमप्याचार्यादिरप्यनिच्छन्तं न
शक्नोति प्रवर्तयितुं तथापि स्वारसिकेच्छारहितमपि शिष्यादिकं स्वप्रवर्तनाबलेनेच्छामुत्पाद्य प्रवर्तयति।

६२

त्तिहैविध्योपपत्तिः। तन्न शाहञ्चवर्णानंतरस्ताविध्याप्रवृत्त्यावाचापीदेः स्वप्रवर्त्तनाज्ञानजनतेनेन प्रवर्तकत्वमप
सातेपि। का पुनः प्रवर्त्तना प्रवृत्तिहेतुभूतः प्रवर्तयितुर्धर्मः। प्रवर्तयितृधर्मत्वाभावे यज्ञदत्त एवं माप्रवर्त्तिष्यत्तिनदे
वदत्त इति व्यवस्थानुपपत्तिः। प्रवृत्तिहेतुज्ञापकत्वेनानुव्यवस्थितेर्देवदत्तस्त्वां प्रवर्त्तयतीति प्रवर्तनाज्ञाप
नाधन्न दत्तस्यापि प्रवर्त्तकत्वापत्तीः। तथा लौकिकलिङोपि गुर्वादिगताज्ञादिज्ञापकस्य प्रवर्त्तकत्वाप
पत्तिः लोके चाचार्यैर्देः प्रवर्तयितुर्धर्मो हमेनं प्रवर्तयामीति प्रत्ययतेपि तु मानसप्रत्यत्तवेधः प्रेषादीरूपो ना
पह्नोतुं शक्यते। वेदे तु पुरुषाभावेन लिङादेरेव प्रवर्तकत्वात्तद्धर्मोगीकार्यः स एव च विधिः तत्वोत्तमप्रव
र्तनमध्येषणं। समस्य मंत्रणं। नीचस्य निमंत्रणमाज्ञारव्यं। एषु च लिङादेरनुशासनाच्छक्तिग्रहः। तत्र नाना
र्थत्वपरिहाराप्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि यच्चतुष्टयानुगतमेकं प्रवर्त्तनात्वं शपक्यतावच्छेदकं ईक्षि
तकर्मणोरिव साध्यत्वं द्वितीयायामिश्रमेति। अत एव हरिदत्तः। अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि। त
त्रैव लिङ् विधातव्यः किमेदस्य विवक्षयेत्याशंक्याह न्यायपद्मुत्पादनार्थं वा प्रपंचार्थमथापि वा। विध्याद

स्याहन्यायसुत्वादनार्थे वा प्रपंचार्थमथापि वा ॥ विध्यादीनामुपादाने चतुर्णामादितः कृतमिति ॥ अत्रलो
किकनिमंत्रणादिभ्यो न्यायप्यलौकिको भेदोस्ति न्यायसिद्ध इति न्यायसूचनं न्यायप्रयुत्पादनं वा च्यताव
च्छेदकस्य प्रवर्तनात्वस्याग्रयाद्यपत्तौ व्यक्त्यो न लौकिका एवेति सूचनं प्रपंचः ननु लोडर्थे प्रैषादिसर्गयो
रपि प्रवर्तनात्वात्कथं चतुरुक्तिः मैवं ॥ कामचरानुज्ञारूपस्यातिसर्गस्य कामचारकारणात्मकामंत्रणरूपस्य
ता प्रवर्तना सामान्यस्यैव च प्राप्ते विषयत्वविशेषितस्य प्रैषत्वात् तदुक्तेः प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्य
भिधीयते अप्राप्ते प्रेषणे सर्वे विधित्वं प्रतिपद्यत इति ॥ स्वाध्यायोध्येतव्य इत्यादौ प्रैषातः पाति वि
शेष्यमृत प्रवर्तनामात्रं लक्ष्यं अप्राप्त प्रवर्तनं च चोदितिरिति विधात्ते तेस्तु तराधार्थः ॥ न्यायसुधाप्य
तु शङ्क्य ग्रहोन्यथा क्षेः बुभुक्षितस्य बालस्य रोदनेन न स्तनयानेन प्रवर्तनां ज्ञात्वास्तन्ये दाने माता प्रव
र्तते तदासौ स्यामानुः प्रवृत्तेः कारणं जिज्ञासमानः कारणान्तरानुपलब्धेस्तत्प्रवर्तनायां कारणत्वं
प्रकल्प्य गामानयेति वाक्यश्रवणानन्तरं प्रयोज्यप्रवृत्तिं दृष्ट्वा मात्रप्रवृत्तिदृष्टान्तेन तस्यामपि प्रव ६३

तेनाज्ञानस्यकारणत्वेमन्तुमापतत्कारणजन्यासायालिङादिशब्दश्रवणानंतर्यात्स्येवाचपश्यतिरे
कास्यांप्रवर्तनालिङ्घामशक्तिंकल्पयतीति।अथप्रवर्तनालक्षणेसर्वेषांपदकृत्यं।तत्राद्यविशेषणेन
प्रवर्तयितृकृतयागादेर्निरासः।धर्मशब्देनचसमवेतत्ववाचिनाप्रवर्तयितृसंबंधिनामपितद्दसम
वेतानांप्रवर्त्यलिङ्शब्दतदुच्चारणानांनिरासः सर्वस्यापिलक्षणस्यफलेतिव्याप्तिस्तस्यप्रवृत्तिप्रतिहे
तुत्वात्प्रवर्तयितृगुर्वादिधर्मत्वाच्च।अतःपरसमवेतिप्रवृत्तिहेतुत्वमत्रविवक्षितंफलेतुप्रवर्त
यितुरेवप्रवृत्तेर्हेतुर्नपरसमवेतप्रवृत्तेर्हेतुरितिनोक्तातिव्याप्तिः।मुद्गलभट्टास्तु।धर्मशब्देनापूर्वनिरासः
प्रवर्तयितृप्रवृत्तेरिष्टसाधनत्वयोः।आद्यविशेषणेननिष्ठीवनादीनामिति।तन्न।धर्मशब्देनापू
र्वनिरासायोगात्।अपूर्वंहिप्रवर्त्यगतंप्रवर्तयितृगतंवा।आद्येप्रवर्त्यपितुरितिषष्ठ्याप्रवर्तयितृ
संबंधित्वोक्तेःप्रवर्त्यगतस्यचापूर्वस्यप्रवर्तयितृसंबंधाप्रसिद्धेस्तद्गतातिव्याप्तेःप्रवर्तयितुरितिषष्ठ्या
तेनैवनिरासात्।द्वितीयेप्रवर्तयितृगतस्यापूर्वस्यप्रवर्त्यप्रवृत्तिंप्रतिहेतुत्वाभावेनतद्गतातिव्याप्तेः।

६४ अत्र त्रिहेतुरित्यनेनैव निरासादिति तत्तदिदं भट्टसोमेश्वरमतं तदभिधाव्यापारस्यैव विधिरूपभावना
त्वे बाधकाभावान्निर्मूलं। तदेतन्मतं मिश्रैः षष्ठाध्ये शास्त्रदीपिकायामुक्तं। अंशत्रयविशिष्टभाव
नाप्रतिपादनं वास्य व्यापारोस्य प्रवर्तकस्यार्थप्रतिपादनरूपस्य व्यापारस्य प्रवर्तनारूपत्वमिति यत्तु
अस्तु तर्ह्यभिधानाख्यो व्यापारोस्य प्रवर्तकः। तस्य स्वार्थप्रतीत्याख्यकार्यं कुर्वतस्य केवलं। कल्प्य प्रवृ
त्ति हेतुत्वे लिङः व्यापारस्येति लाघवमित्याशंक्य शब्दान्तरगतायामस्मिन्नभिधायां प्रवर्तिका। पदार्थे तत्त्वविशे
षश्चेत्तस्यैव स्यात्प्रवर्तकः इति दोषद्वयमुक्तं। न चास्याभिधेयत्वाद्विशेषः कार्यतागतेः। ननु तत्त्वस्याभिधे
यत्वं सर्वासां वा प्रसज्यते इत्यनेन एवं दोषद्वयोद्धारः एवं क्रमन्यदोषद्वयमुक्त्वा तदुद्धानं अथ प्रवर्तना
त्वेन कार्यत्वेन वा बोध्यते। तद्रूपेणाभिधेयत्वं तत्त्वान्यासु न विद्यते इत्याशंक्य तत्त्वं चास्याह अभिधानाख्याभि
प्रवर्तकरूपता। स्यादर्थमभिधेयत्वं तस्ति चेत्स्यादसत्यते विकल्प्य दूषणद्वयमुक्तं। तदेतल्लिङः प्र
वर्तकत्वं विहाय तदभिधायाः प्रवर्तकत्वमुच्यते। अभिधानं विनापि हि प्रवर्तकस्वभावस्येले ६४

केप्याचार्या देवैदेव लिङादेर्व्यापारमेवाभिधेयत्वं न त्विदं दूषणं लिङः प्रवर्तकत्वेभिधापारस्य प्रव
र्तनात्वे प्रसज्यते यथा ह्यभिधार्थशेधाख्यकर्पोड्डुद्दापि न प्रवृत्तिहेतुरेव त्वदभ्युपेतोपि व्यापारे
ऽभिहितः शब्दो प्रवृत्तिं दक्षाप्तवाक्यवद्वाभि कश्चिल्लिङादि प्रवृत्तिहेतुर्व्यापार इति सामान्यतोवगतोपि
न प्रवृत्तिहेतुरतस्तव पाश्वसो प्रवर्तनात्वेन शब्देन तत्रापि लिङे वाभिहितः सन्नत्र स्वप्रवर्तनात्वं निर्वाह
पस्वविषयस्येष्टसाधनतावगतोपि तेपमुखेनेच्छाजनयन्प्रवृत्तौ हेतुर्वाक्यार्थज्ञानद्वपदाभिहितत्वं एवप
दार्थद्वयस्य वक्ष्यमभ्युपेयं तच्चैतन्ममापि तुल्यमिति न सोमेश्वरोक्तदूषणावकाशः कश्चित्तस्माद्द्वे
लिङादिरेव प्रवर्तकः तदभिधेय च प्रवर्तना विशेषः प्रेरणा विधिरिति वोच्यते इति इति विध्याख्या
शाब्दभावनानिरूपणं निवारणारूपापि शाब्दभावना निवर्तनारूप सामान्यातो निवारणारूप
विशेषतश्च विधिवदेव प्रसाध्या सापि च निवृत्तिहेतुर्निवर्तयितुर्धर्मरूपा अहमेधं निवर्तयामि
ति निवर्तयितुर्मानसप्रयत्नरूपैव धा प्रवर्तनावत्। सापि वस्तुनोत्र मसमविषयत्वेनच्चे धा लोके पुंधर्मो

वेदे च पुरुषाभावात्तदीयाज्ञापविशेषरूपत्वस्यासंभवाल्लिङादेरेव निवर्तकत्वात्तद्धर्मभूता च
तुर्थ्यपि विधिर्भागाकार्या । सैव च प्रतिषेधो निषेधो निषेध इति च गीयते । लोके तु लड्भयुव्यवहारे
विधिव्यवहारवद्वाक्य एवा तत्र त्वेतावान् विशेषः न निवर्तनायां विधिनिचत्रणेतिवत्प्रवर्तनायां शक्तिप्र
ग्राहकमनुशासनमस्ति तथा चानादौ संसारे नञनुपहितलिङादिश्रवणानुविधायिनी प्रयोज्यवृद्धनिवृत्ति
दृष्ट्वा श्रावापोद्वापाभ्यां नञनुपहितलिङादेर्निवृत्त्यावेव शक्तिग्रहे प्रसक्ते गुहाणाहं निवर्त्तके न निवर्त्तते
निवर्तेइत्यादिगुरौ निवर्तकत्वव्यवहारान्यथानुपपत्त्या प्रवर्तनायामिव प्रवर्तकत्वान्यथानुपपत्त्या तद्
यारन्न तावां निवर्तनायां शक्तिग्रहो भवति स्फुरितसौः तदुक्तं तद्धर्माधिकरणवार्त्तिके । विधायके रसे
युक्तो न हि नञ्प्रतिपद्यकः । विधिना युज्यते यत्र तह त्वाज्ञापि वेदितात्त्राभावार्थता नेवस्वपंपुसो
ऽस्त्येण्डिहीति न च प्रतिपद्यकः विधिनांयु । अत्र नञो निवर्तनायां शक्त्या न जिकायां तु प्रतिषेधवि
धिपरो हि विधायक इत्यादौ प्रत्ययार्थलिङ्गलक्षणा वाक्यभेदप्रसंग इत्यतो तेग्रंथे विधायकपदेन लि ६५

ङ॰एवंप्रतिषेधार्थत्वेतुअपिपक्षउक्तः तथावनिषेधलिंगविवक्षायांतस्यैवावृत्तिस्तत्राननञःपर्युदा
सप्रर्थत्वेतुएवंमतमस्तुत्वात्तत्रानञादेरभावविषयायाः लिंङादेश्चप्रवर्तनाविषयायाःशक्तेस्त्याग
स्याविशेषेपितथाननञादेर्निवर्तनावाचित्वपक्षेतत्समभिव्याहृतलिङादेशगादिप्राप्तप्रवर्तनानु
वादकत्वस्यलिङादेश्चनिवर्तनावाचित्वपक्षेनञादेस्तत्फलीभूताभावप्रवृत्त्यभावानुवादकत्वस्याविशेषे
पिश्रमानेनानाःप्रतिषेधद्वैताव्यपचतुष्टयेपेशक्तिचतुष्टयंकल्प्यमित्याद्यपक्षेलाघवंलिङ्लोट्पंचमल
काराणांतव्यादीनांचानेकेपावृत्तानांचतुष्टयाधिकशक्तिकल्पनापत्त्यागौरवान्नप्रत्ययशक्तिकल्प
नापक्षोपुक्तोप्युक्तइतिनञिशक्तिर्वातिककृताद्विरभिधानेनतत्रादरंसूचयताध्वनितमितिइतिप्रतिष
तिधात्व्यशाहृताभावनानिरूपणेसेपंहूप्यपिशाहृताभावनाप्राप्तास्यपक्षानानुगृहीतेवस्वफलभूतांप्रवृत्तिंच
नपतितातदिकर्तव्यतात्वेनोपपत्तेगृहीतिवास्थिवादेःस्वाम्नानार्थवत्वापत्त्यस्थितांतस्याश्चेतिकर्तव्यतांप
सातस्त्वपश्चार्थभावनाद्विधात्रपाकृतमर्थेनप्रतीतेततएवचभाव्यकरणयोराकांक्षाएवंमत्वपेक्ष

६६

66

तानान्यथा। न च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकविधिवाक्येषु स्वरूपतेः सत्यपि कर्तव्यत्वेन प्रतीताप्
त्तेर्कालार्थभावनैवाध्ययनविधौ सा विधीयमानत्वात्कर्तव्यत्वेन प्रतीयते तदुक्तं। वार्तिके साध्येवं
प्रवर्तते इति। व्याख्यातं चाभियुक्तैः॥ अध्ययनविधिवशात्कार्यत्वेन प्रतीयत इ॥ ननु तत्राप्याख्यात
प्रत्ययोक्तार्थभावनैवाध्ययनकरणका विधीयते न नु प्रेरणा तस्या आख्यातवाच्यत्वाभावाल्लिङ्
च विधिरूपानुक्तेः। अत्रोच्यते। न तावत्संकुदामच द्वितीयाभंगात्पुरोहितं वृणीत इति वत् द्वित
यावधृतप्रधानभावं स्वाध्यायं प्रति गुणभूताध्ययनभावनावगता। ततः संस्कार्यत्वानुपपत्त्यायमे
व विधिः शक्त्यनुसारेण स्वाध्यायं संभवि निर्दिष्टे विनियुज्य पर्यवस्यतीति तत्तायेषु तं। तत्र विध्यंशे तात्प
र्यस्य प्रवृत्तिरिच्छया दृष्टं। तत्र च शब्दानां करणत्वेनाप्तत्वे नियतकरणत्वासंभवात्स्वार्थज्ञाने कर्तृत्वेनैव
स्वाध्याये विनियुज्यते। अंतरंगं च कर्तृकारकं क्रियायाः अत एवाख्यातानि हि हितासंख्यानानि ६६
ते पि कर्तर्येवान्वितानुक्तं कर्त्रधिकरणे। एवं कर्तर्यास्वाध्याये विनियुक्तेऽर्थवादादेर्गुणत्वाद्विधा

पक्षस्यैव प्राधान्यात्प्रातिस्विकवाक्यस्यालिङः कर्तृत्वेन विनियुज्यते ध्यापनेनोपात्तालिवादुद्देशे
भावयेयुरिति ततः किमित्यपेक्षितसामर्थ्यादेवापुरुषप्रवृत्तिमिति भावयेयुरिति वदध्याहृत्य संवध्यते प्रयु
तार्थोपपत्तिमूलकमध्यापध्याहारे इष्टत्वाच्छिनघ्रीत्यादिवत्तादुक्तमर्थवादाधिकरणवार्त्तिके ततः किमि
त्यपेक्षितसामर्थ्यादेव पुरुषप्रवर्तनमिति संबध्यते इति तेनेदं श्रुतानुमितैकदेशनिषत्तं माहावाक्य
भवति अध्ययनसंस्कृताः स्वाध्यायपदोपात्ता लिङ् पुरुषप्रवृत्तिं भावयेयुरिति अयमेव वेदवाक्यार्थः पारमार्थि
कोन्याथाशब्दभावमापाः कार्यत्वानवगमात्तदिदि कर्तव्यताभ्रान्तप्रशस्तलक्षणयार्थवादप्रामाण्यप
सिद्धेरत्नन्त्वर्थपादाधिकरणएवाद्यस्त्रेवाचार्यैः कर्मस्वर्थज्ञानस्य त्वेलिङिनिगिक विनियोगात्तदर्थाध्यय
नविधिरधीते न स्वाध्यायेन फलवदर्थाववोधं भावयेदिती सुक्तात हिरुद्धा कर्तृत्वोक्तिः प्रवृत्तिफलत्वोक्ति
श्चासत्यमुक्तं नतु विरोधः । शब्दभावनायां हि लिङादीनां कर्तृत्वसत्यर्थात्फलवदर्थाववोधकरणत्वं फलि
तं भवतीति प्रवृत्तिकर्तृत्वमेवार्थाववोधकरणत्वेन फलितं व्याख्यातमित्यविरोधः प्रवृत्तिफलत्वं तु फ

६७ वदर्थावबोधद्वारेति न माव्यद्रूपविरोधाः। लिङो हि प्रवृत्तिरूपस्य वाक्यार्थस्य साधनतया बोधं कृत्वा
प्रवृत्तिं जनयतीति नान्यथेति निर्वृत्तमपि चेतनप्रवर्तनात्मा विधिः कथमचेतना लिङो नियुज्यत इति चेतन
67 सत्यं उपाया सत्यत्वेषु पेयसत्यत्वात्। यथा वर्णलोपागमविकाराद्यसत्यत्वेऽपि तेन सत्यमेव साधुत्वं ज्ञाप्य
ते शिष्टपरिग्रहाद्यातव्याकरणप्रामाण्यात्। एवमिहाध्येतात्तव्लिङ्व्यापारभूतशाब्दभावनाकर्तृ
व्यतां बुध्यते तद्गत चेतनस्य लिङ्प्रारोपात् नियोजयत्वमसत्यमेवातिनोपायेन शाब्दभावनाकर्तव्यत्वं स
ज्ञाप्यते अर्थवादप्रामाण्यात्। तस्माद्युक्तं जैवत्वे तदिति कर्तव्यताभूत प्राशस्त्यानपेक्षणात् लक्षणयार्थवादप्र
माण्यं न स्यादिति। एवं कर्तव्यत्वेनावगतायाः शाब्दभावनायाः करणशब्दालोचनेऽपि विधिज्ञानमेवा
अथ केनेत्यपेक्षिते पूर्वसंबंधानुभावापेक्षेण विधिविज्ञानेनेति संबध्यत इति वार्तिकात युक्तं चेतनपो
हि स्वरूपतो भावनया साध्यः समस्तस्यापि फलोपहितायाः करणं भवति। एवं विधिज्ञानं तु तद्व्यापारः कार
णत्वनिर्वाहकोपागस्य वाक्यर्थमित्याहुः। लिङो निधीसेव च शाब्दभावना भावं च तस्याः पुरुषप्रवृत्तेः स ६७

वंधेवाधःकारणंतदीयंप्ररोचनाचांगतोयोपपुज्यतइति।अत्रप्रवेशव्यतेनयेतिप्ररोचनाशशास्त्रज्ञाभ्रांतत्त्वं
गाफलोपकारीप्रयाजादिवत्।तज्ज्ञन्यनुप्ररोचनंप्रह्व।त्रिप्रतित्वंधंकालस्येमंगंउपेकारोरात्वनिर्वाहकः।प्रय
जादिजन्यास्वर्ववतप्रयाइत्यदेवतवद्वाार्थवादइतिज्ञेयंइतिशाद्भावनेतिकर्तव्यतानिरूपणं।अर्थेद्वितीयाध्या
पार्थकर्मभेदप्रसंगात्सर्वेकर्मभेदो।निरूप्यते।कर्मद्विविधंलौकिकंवैदिकंच।वैदिकमपित्रिविधंप्रहत्रिरूपं
नित्यंलिरूपमुभयरूपंचयस्तुदासइति।तत्राद्यंकर्मत्रिविधंक्रत्वर्थंपुरुषार्थमध्ययनमाधानंचनक्रत्वर्थं
तपुरुषार्थमितितंत्ररत्नेद्रव्यार्जनवर्णके।शास्त्रदीपिकायांतुतच्चैवपड्भावनाकथंभावप्रकरणार्थंविधाय
तैतत्क्रत्वार्थं।अन्यत्करणंफलंचपुरुषार्थमितिग्रंथेनदेविध्यमेकेवोक्तं।यद्गुरूणामपिष्टंतन्मतेहित
त्रतंत्ररत्नएवोक्तं।अध्ययनस्यपुरुषार्थत्वमिष्टमितिद्वैविध्येतुफलेद्रव्यार्जनवर्णकएवनचाधानवद्ग
विदुमर्हतीतिभाष्यस्यव्याख्यापंचकेक्रत्वर्थत्वमिपथाधानंनक्रत्वर्थंनपुरुषार्थमेवंस्यात्प्रभवतीति
ग्रंथस्यपूर्वपक्षग्रंथत्वेपिन्याधानंनपुरुषार्थमितिसिद्धांतवार्तिकं।तत्तुतंत्ररत्नेप्रत्यक्षेणद्रव्यार्जनस्यपण

६८ 68 पुरुषार्थतावगम्यते तेनैव प्राधान्यस्यापि भुवकर्मणामुक्तं मन्त्रैविधो मूलमस्ति हि द्विविधं तु मूलमपाततः क्रत्व
र्थपुरुषार्थयोर्जिज्ञासेति सूत्रमेवञ्चत्र हि द्विविधमेव कर्मणामुक्तं नत्रैविध्यं भाव्यमप्येवमेवञ्चाङ्गं क्रत्वर्थं
प्रधानं पुरुषार्थं इत्यादि स्मृत्यन्तु ग्रन्थात् मारब्धान्त्रैविध्यं हृषणादिव शास्त्रदीपिकाप्रकाशानुसंधेयं पुनरपि
वैदिकं कर्म द्विविधं गुणकर्म प्रधानकर्म चार्थकर्मापरपर्यायं तत्राद्यं यथा धाना द्वितीयं यथाग्निहोत्रादि
क्रत्वर्थमपि द्विविधमाराडुपकारकं संनिपत्योपकारकं चा तत्राद्यमदृष्टार्थमेव यथा प्रयाजाः संनिपत्योप
कारकं तु त्रिविधं दृष्टार्थमदृष्टार्थमुभयार्थं चारञ्जपि कर्मोरव्यं दृष्टार्थमपि द्वित्रिविधं माद्युपयोग
संस्कारार्थभूतोपयोगसंस्कारार्थं चेति तत्राद्यं द्रव्यं प्रत्येकं द्विविधं द्रव्यसंस्कारकं चेति तत्र दृष्टार्थे माद्यु
पयोगद्रव्यसंस्कारार्थे संनिपत्योपकारकं द्विविधं साक्षाद्विनियुक्तसंस्कारार्थं साक्षाद्विनियुक्तस्योप
पकारकं तत्संस्कारार्थं चेति तत्राद्यं यथा व्रीहीनवहन्तीति द्वितीयं यथा वत्समालभेतेति अत एव वत्स ६८
स्यैव विनियुक्तगोदोहाङ्गगोद्रव्योपकारकत्वाद्वत्समालम्भेतेत्यत्रालम्भसंस्कारत्वमिति पशुसोमाधिकर

णे भवदेवः भूतोपयोगद्रव्यसंस्कारार्थं दृष्टार्थं संनिपत्योपकारकं प्रतिपत्तिः। भाक्तिविधा
प्रधानोत्तरकालात्तत्पूर्वकालात्तत्समकालाच्च। तत्राद्या यथा चात्वाले कृष्णविषाणां प्रा
स्यतीत्यादिः। द्वितीया यथा॥ २॥ हृत्स्वविष्पतिलोहितं निरस्यतीति विधानाद्धृषद्धा। इडां पञ्चत्तुर्थं पशावक्त
लं माल्लीहितशकृतोरकर्मत्वमित्यधिकरणे प्रतिपादितं। प्रधानसमकालाय यथाऽग्नेयपवोदनया विहितय
गे चतुरवत्तं जुहोतीति होमरूपा प्रतिपत्तिः होमो हविषश्शकृते जुहोतीति विधानाद्धृषद्धारेरश्चारणात्
रत्नेणे धृत्युणाकलेव्यः तस्मिन्नेव च दक्षेण्या यागस्मरणार्थं नवषद्धारेण स्मरितो यागो यजमानेनानुष्ठेयः
तदिदं सर्वं प्रदानाधिकरणे वार्तिके प्रतिपादितं भूतभाव्युपयोगाभयसंस्कारार्थं तु द्रव्यसंस्कारकं स
त्तिवभूतभाव्युपयोगाभयदेयता संस्कारकस्तुपश्चुपुरोडाशीयाग्नाग्निकर्मभेदेषु वक्ष्यते। अदृष्टार्थं
संनिपत्योपकारकं पत्नदपि प्रतिपत्तिदेवत्ति विधा। भूतोपयोगसंस्कारार्थं भाव्युपयोगसंस्कारार्थमुभयो
गसमकालं वा तत्राद्यं यथाऽऽज्ञतह विर्दाहः। शृतस्पचारकस्य विधिप्राप्तः। न चेयं प्रतिपत्तिः होमेन प्रतिप

६९

69

हित्तस्याकारणोकारत्वानिवृत्तेरप्रतिपन्नत्वंतरानपेक्षत्वात। भावुपयोगद्रव्यसंस्कारार्थमपिद्विविधंसाक्षा
द्विनियुक्तसंस्कारार्थंसाक्षाद्विनियुक्तस्यापदुपकारकत्वंसंस्कारार्थंचेतितत्राद्यंयथाव्रीहीनवहन्ती
तीति।द्वितीयंयथादशमेखलेवाल्पास्थाराबाद्धुति:कर्तव्याविनियुक्तस्यासंबद्धत्वेनाविनि
युक्तस्याणुसंबद्धत्वेनवाराद्युपकारित्वादितिपूर्वपक्षयित्वासिद्धांतितंनकर्तव्यारूपापेक्षमाव
वृश्चनस्याणुरितिततःसंस्कारद्वारेणरूपसंस्कारार्थत्वादितितृतीयंयथाएककपालमपर्यावर्तयन्जु
होतीतिप्रकृतौनुपर्यावर्तनविधिरदृष्टार्थएवदृष्टोभयार्थमाश्रपितकर्मोपपन्नदपिचविधिःकिं
चिद्द्रव्यप्रक्षेपांशेनदृष्टार्थंदेवतोद्देशांशेनत्वदृष्टार्थोयथास्विष्टकृद्यागः अग्नेःस्विष्टकृतःक्वचिददृष्टा
र्थाविनियोगात। किंचिद्देवतोद्देशांशेनदृष्टार्थंद्रव्यप्रक्षेपांशेनादृष्टार्थंयथोत्तमःप्रयाजःतत्र
हिस्वाहाग्निंस्वाहासोममित्यादिपाक्यामंत्रलिंगात्क्रमेणप्रत्यभिज्ञायमानाआज्यभागादिषुपक्ष ६९
माणाएवदेवताःसंस्कार्याःतदेतद्दशमेप्रयाजेचतन्यापत्त्वादित्यधिकरणेप्रतिपादितंपशुपु

रोडाशयागोप्येच भेतिदशमस्यैव पशावंधीतिचेदित्यधिकारेणोक्तितं पादितं । अत्रेदं चिन्त्यते अग्नीषोमी-
यस्य पशोः पुरोडाशमनु निर्वपतीत्यग्नीषोमदेवतासंस्कारार्थतया विहितः पुरोडाशयागोऽन्तरं वपायागा-
भ्यासार्थ एवोत तथा व्यंगपशुयागाभ्यासार्थ एवोतोभयार्थो वेति । तत्राद्यः पक्षः वपायागाभ्यासार्थ एवासंस्कृ-
र्यदेवतापाउभपत्र भलेपिवाजपेयेने बृहस्पतिसवेन यजेतेति वत्तं ... पौर्णमासी विमृधमनु
निर्वपतीति वच्च वाक्येन वपायागाभ्यासमात्रार्थत्वावगमादिति स्थितौ यस्तु पुरोडाशयागस्त-
द्वाक्यादेवाग्नीषोमदेवतासंस्कारार्थः तत्र वपायागस्य वाक्यादेवताग्नीषोमौ देवतारूपोद्देश्यवि-
शेषणत्वे स्वतन्त्रोद्देश्यत्वे वा वाक्यभेदापत्तिः बृहस्पतिसवे वैमृधपौर्णमासीनापत्ते दोषः तस्मात्तदाव्यंग
भ्यासार्थमवतत्रोत्पत्तिः संनिपत्योपकारिणाः पूर्वं प्रधानोत्पत्त्यपूर्वे स्वव्याप्रियते इति हि सार्वत्रि-
कं क्वचिदेव तत्वगत्या तदुत्पन्नस्यैव प्रधानापूर्वस्य धारणे व्याप्रियत इति कल्प्यते तात्ददिह व्यंगप-
गाभ्यासापूर्वोत्पन्नो पुरोडाशयागोऽपि पूर्वस्य व्यापारसंभवे उत्पन्नवपायागाभ्यासापूर्वधारणे व्याप्र

राम:।।
७०

70

रकल्पनानसंभवति।तस्मात्पुरोडाशयागोप्युत्तमपशुयागवद्यक्ष्यमाणदेवतासंस्कारार्थ एवेति सिद्धांत:
स्तुप्रकरणावगतोभयार्थत्वबलेन भूतोपयोगस्याप्युपयोगदेवतासंस्कारार्थत्वावश्यंभावादुत्पन्नमा।
पूर्वस्यधारणमनुपपन्नस्य चोत्पत्तिरित्यविरोधात्तदुभयाभ्यासार्थत्वमेवेति।किंचिदाग्रपिकर्मदेवतो
शोर्धेनापिदृष्टार्थद्रव्यप्रक्षेपांशेनापिद्रव्यत्यागांशेनैवतुकेवलमदृष्टार्थमित्याग्रपिकर्मता
मतेयथासूक्तवाकेनप्रस्तरंप्रहरतीतिप्रस्तरस्तीतिप्रस्तरप्रहरणस्यसूक्तवाक्यप्रकाशितेन्द्रदेवताक
ल्पनाद्युदृष्टांशेनापिदृष्टार्थ।एवंप्रस्तरजुहूमासादयंतीत्युपयुक्तप्रस्तरद्रव्यप्रक्षेपांशेनापिदृष्टा
र्थत्वस्यागममात्रंतुतत्राद्दष्टार्थमिति।पुनरपिवैदिकंकर्मचतुर्विधंतत्रयत्किंप्राप्तिविकृतिसंस्कृत्यर्थंतत्
नात्तत्राद्यंयथाग्नीनाह्निःसमेतीतिपयवनपुरोडाशपिंडोत्पत्त्यर्थं।यागादिचस्वर्गाद्युत्पत्त्यर्थं।द्वितीयं
यथादोग्धीतिऊधःस्थस्यैवहिदुग्धस्यप्राप्त्यर्थंहिदोहनं।तृतीयंयथाव्रीहीनवहंतीतिवैरूप्यरूपविका
रार्थत्वात्।चतुर्थंयथाव्रीहीन्प्रोक्षतीतिअदृष्टरूपसंस्कारार्थत्वात्।पुनरपिवैदिकंकर्मचतुर्विधं: ७०

प्रकृतिर्विकृतिरुभयात्मकमनुभयात्मकं च। तत्राद्यं यथाग्निहोत्रदर्शपूर्णमासादि। द्वितीयं यथा मासाग्निहोत्र
दि। तृतीयं यथाग्नीषोमीयसवनीयपश्वादि। अत्र प्रथमे होतदुक्तं दर्शपूर्णमासयोरग्नीषोमीयो विकृतिस्तस
च सवनीयपशोस्तेषां चैकादशिनाः सुत्याकालत्वसाम्यात्तेषां च प्राजापत्याः पशुगणत्वसाम्यादिति। च
तुर्थं यथा दर्विहोमा नारिष्ठादयः तेषां त्वपूर्वत्वमष्टमाध्याय उक्तं। एवं प्रह्वमेधापाधापीति। पुनरपि वैदिकं
कर्म द्विविधं नैमित्तिकं काम्यं च नैमित्तिकमपि द्विविधं नियतनिमित्तकमनियतनिमित्तकं च। अनियत
निमित्तकमपि द्विविधं दोषनिर्घातार्थमदोषनिर्घातार्थं च। तत्र नियतनिमित्तकं यथा यावज्जीवमग्नि
होत्रं जुहोति वसन्ते वसन्ते ज्योतिषा यजेतेति तत्राद्यं यावज्जीवाधिकरणे प्रतिपादितं द्वितीयं तु षष्ठे सोम
विधाप्रजमृणवाकेन संयोगादित्यधिकरणे प्रतिपादितं। अनियतनिमित्तकदोषनिर्घातार्थं यथा योम
वास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृतेऽष्टाकपालं निर्वपेदिति पौमावास्यां पौर्णमासीं वातिपात
येद्वैश्वानरं द्वादशकपालं निर्वपेदिति च। दोषनिर्घातार्थत्वादेवैकार्थत्वादनयोः विकल्पो द्वादशे प्रायश्चि

७१ हेतुश्चैककार्यत्वादित्यधिकरणे व्यवस्थापितं । अनियतमदोषनिर्घातार्थं यथा द्वादशे एव समुच्चयस्य दोषनिर्घातार्थत्वे स्थिते
सर्वापवादोर्थेऽधिकरणे प्रतिपादितं । नित्ये जुहोतीत्यादि काम्यमपि कर्म त्रिविधं ऐहिकफलकमामुष्मिकफल
कमनियतफलकं च । तत्राद्यं यथा कारीर्या वृष्टिकामो यजेत श्येनेनाभिचरन् यजेतेति जातेष्टिश्च पुत्रत्वादिफ
71 लिका । उपस्थितसस्यार्थे वहि वृष्टिः सर्वैः काम्यते तेन तदुपस्थिते ऐहिकस्यैहिकसस्यार्थापि किमुत जन्मान्तरीय
सस्यार्थं । एवमभिचारोऽप्यनुपस्थितशत्रोरेव काम्यते तेनानुपस्थितस्यैहिकस्यापि किमुत जन्मान्तरीयस्यापि
वंश्यत्वामभिचारोऽप्यनुपस्थितशत्रोरेव काम्यते नानुधर्मिपापहृज्जायते पुत्रतस्य च काम्यते न कालान्तर
जातस्यैहिकस्यापि किमुत जन्मान्तरीयस्येति । आमुष्मिकफलकं यथा स्वर्गकामोऽग्निहोत्रादि न हि स्वर्गः के
वलसुखात्मकोऽमानुषशरीरेण सुखदुःखोपभोगार्थं धर्माधर्मोभयारब्धेनानुभवितुं शक्य इति स्थि
अनियतफलकं यथा चित्रया यजेत पशुकाम इत्यादि । पश्वादि हि फलमैहिकामुष्मिकत्वेनानिय
तमिति चतुर्थे योगसिद्ध्यधिकरणे प्रतिपादितमिति । निवृत्तिरूपमपि कर्म द्विधं आत्मार्थं पुरुषार्थं च । ७१
तत्राद्यं यथा नातिरात्रे षोडशिनं गृह्णातीति द्वितीयं यथा न हिंस्यात्सर्वा भूतानीति । प्रवृत्तिनिवृत्त्यात्म

कर्तव्योभयरूपंपर्युदासात्वंयत्कर्मतत्तदपि द्विविधं क्रत्वर्थपुरुषार्थंच तत्राद्यंयथायजतिषुयेयजामहं
करोतिनानूयाजेष्विति नार्षेयंवृणीतेन होतारंवृणीत इतिच। द्वितीयंयथा नेक्षेतोद्यंतमादित्यमिति
॥ ॥इतिश्रीमत्सर्ववाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधर[illegible]महना
ग्राणात्मजभट्टशंकरकृते मीमांसाबालप्रकाशे सकलकर्मभेदनिरूपणं॥ ॥संख्याधिकरणे सप्तद
शप्राजापत्यान्पशूनालभत इत्युदाहरणे एकस्य हृदयाद्येकादशावदानगणस्य प्रापकोपश्वादक
सहत्वात्कर्मभेदः प्रतिपादितः। एवंचैधत्वचोदकोनास्ति तत्र तदपवादः यथानवमीयां त्वयज्ञमेधे
तमीशानायपरस्वतयालभेतेनान्यर्थग्निकृतनारण्याननुत्सृजतीत्युदाहृत्य प्रतिपादितं तानर्यर्ये
ग्निकृतानि तिगुणवाकेन तदंतागरीति विधानादपूर्वत्वमिति। ततश्च हृदयाद्येकादशावदान
गप्रापकस्य चोदकस्याभावादेकएधयागोनेकपशुद्रव्यकः प्रजापतेरपुर्वेपत्नइचाइयास्तुविधे
घस्तत्रालंभविशासनाद्यभावाद्वपाहरणाद्यनिष्कासैपेव कृत्वा एव पश्चवपविभेदेवतोहृदेशेनतास्या।

७२ इति॥ तदुक्तं सर्वप्रदानाधिकरणे मिश्रैः॥ त्यागमात्रेण होमाभावेपि पर्यग्निकृतानारणानुत्सृजतीति
वद्देवतासंबंधोपपत्तेरिति॥ अतश्च संख्याधिकरणे न्यायसुधाकृता रणेषु यथोभमेरुक्तः सप्तान्तैवे
७२ लुपेहितव्यः॥ एवंसति केचिदाक्षिपंति॥ एकादशे पंचशारदीयाख्ये ति चेदित्यत्रोदाहृतं वैशाख्याम
मावास्यायां सप्तदश मारुतान्वित्साउपाकरोतीति सप्तदशपृश्नीनुक्षणस्तान् पर्यग्निकृतानितरानालभे
तेप्रेतरानुत्सृजेतीति॥ तत्र च सिद्धांतितं पर्यग्निकृतवाक्येनतरं तांगरीति विधिः उक्तवाक्ये वमारुतपशू
नुषंगेण सप्तदशोत्तयागा विधीयंत इति वित्सायागैः सप्तदशभिः सहचतुस्त्रिंशत्कर्माणीति त
दनुपपन्नं॥ अत्रापि त्सुत्तवाक्येप्येक एव यागः प्राप्तोतितदंतांगरीति विधिनादाराणे कच्चोदकाभा
वेन प्राजापत्यन्यायाभावादिति॥ अत्र ब्रूमः उत्तवाक्ये आख्यातश्रवणात् त्रिवत्सावाक्यश्रुतमुप
करोतीत्यनुषज्यते तच्च तत्रानेककर्मविधायि त्सुत्तवाक्येनुषज्यमानमपि रूपापानेकमेवक
र्म विधत्ते अन्यथा सकृदाम्नातमुपाकरोतीत्यादर्ख्यातं त्रिवत्सवाक्ये सप्तदशकर्माणि विधत्ते ७२

ते उक्तवाक्ये चैकं कर्म विधत्त इति वैरूप्यमापद्येतेति ॥ ॥ इति संख्याधिकरणन्याय विषया विवेकनिरू-
पणं ॥ ॥ द्वितीये इन्द्रियकामाधिकरणे गुणफलसंबंधस्तत्र ऊक्तः । तदेवं चिंतस्य त्वाश्रयस्य लक्षणमुक्तं फलं
यविधिप्रमाणो गुणोयत्र कारकतामापद्यते स आश्रय इति तदिदमव्यापकं ज्योतिष्टोमेकाम्यावस्यादि-
स्याश्रयत्वेन मीमांसकाभिमतेन ह्युवाद्यादिसंख्याया फलार्थं क्रियमाणायमपि ज्योतिष्टोमे साकारकामव-
ति किंतु सोम एवा अतः फलाय विधीयमानो गुणो यां क्रियामपेक्षते स आश्रय इत्येवाश्रयलक्षणमभिमतो
संख्या च समाप्तिरूपत्वात्समाप्तिमंतमपेक्षते अतो स्तेवेदं लक्षणमुवध्यादिसंख्याश्रयभूते ज्योतिष्टोमे-
तिनव्याप्तिः । तथा फलार्थो गुणोपचकारकमित्याश्रयलक्षणं सांकेत्रस्थापेक्षणी साहित्यं फलार्थो गुण-
न प्रकृते आश्रयत्वेन संमतेमाव्याधायागेद्धिकुरधिकरणे क्रियाकारकभावश्रुत इति तत्राप्यव्याप्तिरितेण-
क्रमेव लक्षणमाश्रयस्य युक्तमिति तथा रेवत्यधिकरणे क्रियाकारकभावश्रुतिरिक्तेनापि समानकर्तृकत्वा-
संबंधेनाश्रयाश्रयि संबंधं पाणेनसहरैवती वारवंतीयसंबंधकारणोस्यफलाय विधीयमानस्य गुणस्याश्र-

का क्रियाकारकभ्यवव्यतिरिक्तसंबंधांतरेणाश्रयाश्रयिभावेन संभवतीति नोक्तमस्ति किंतु तत्संभवमंगी
कृत्यैवान्यदेवाध्वरंदृष्ट्वा एवमप्यग्निष्टोमसामेति नावकल्प्यत इति। तस्मादुक्तमेवाश्रयत्वलक्षणमभिप
पतं लक्षितेन फलार्थोऽनुष्ठास्यपत्र कारकत्वमिति। इत्याश्रयत्वलक्षणनिरूपणं प्रकरणांतराधिकरणे
पंचविधमनुपादेयमुक्तं देशः कालः फलं निमित्तं संस्कारं चेति। अनुपादेयसंनिधिसच्चिवस्थासंनिधिः
प्रकरणांतरमिति प्रकरणांतरलक्षणमुक्तं सर्वपर्येषु तत्र्व वारुण्या निष्कासेनानुषेभ्या वभृथं यं
तीत्यत्राध्याम्नं तत्र हि प्रकरणांतरेणैव भेदउक्तो वार्तिके पुरणांतराधिकरण एव। शास्त्रदीपिकायाम
पि सप्तमेत धात्यया: सोमादित्याधिकरणे उक्तं यंतीत्यनेन प्रकरणांतरन्यायेन कर्मांतरं विधीयत इति
अवभृथे सोमेष्वाः समादधात्यस्येवोक्तलक्षणं तत्र वारुण्या निष्कासस्यानुषाणां च मृतोपयोगित्वेन
संस्कार्यतयानुपादेयत्वादिति तिवदुक्तं तेन तृतीयपयानुपत्त निष्कासस्य सधनत्वोक्तावपि निष्कामस
वारुण्या मिकृष्य पत्वानुषाणां चाग्नेयादियागं प्रेषत्वाधिक्विचित्सोमलिप्तस्यातेनावभृथं यंतीति ७३

वत्सप्रां जशेषेण हवींष्यभिघारयतीति वचप्रतिपाद्याचरूपसंस्कार्यत्वाविरोध इति तन्मंदां अयिकरणवि
रोधात् ॥ एकादशेष्वस्मिन्नेव वाक्ये सवनीयवत्सवारविप्रकर्षपूर्वपक्षे विधांतरेण निरस्य प्रतिपत्तिरि ति
पूर्वपक्षांतरं तुषनिष्कासाख्यसंस्कार्यद्वयोद्देशाद्वाक्यभेदापत्तेर्निरस्यार्थकर्मत्वमेवोक्तं । अत एव प्रक
रणांतरलक्षणं वाक्ये नात्रासंनिधिरिवस्वरूपतोऽनुपादेयसंनिधिः प्रवेशपः किंतु तत्कार्यविधेरूपपदार्थे सं
क्रमभाव: स च पश्चादनुपादेयसंनिधिना भवति: एवमनुपादेयद्वसंनिधिनापि भवति तस्माद्विधेरूपप
दार्थसंक्रमासंभवेन सहकृतोऽसंनिधिः प्रकरणांतरमिति प्रकरणांतरलक्षणमभिप्रेतं अत एव वि
श्वजिता यजेतेत्यादौ यशेषपदार्थो विधेयानास्त्येव नामधेयमात्रश्रवणात्तत्रोपपदसंक्रमासं
भवसहकृतादसंनिधेरेव भेद इत्यावयोः अत एवोद्भिदादीनामेवं चैवमादीनां इति संनिधावेव भ
प्राभेदस्तूक्तः एवमैथे यज्ञेपातिरित्यादावपि अष्टमतृतीये वज्ञनकसप्तरात्रप्रकरणप्रातेचत्वारि त्रि
वृंत्यहान्यग्निष्टोमस्तुरवानीति वाक्ये वत्तुःसंख्याविवृत्त्वरूपानेकोपादेयगुणश्रवणे तु प्रतिनिष्कासवाक्य

वत्प्रकरणांतरम्न्यायेनैव भेदोप्युपपातः। अत एव च प्रकरणांतरोधिकरणांतराधिकरणे मासमग्निहोत्रं जु
होतीत्यादावनुपादेयगुणवति वाक्ये उपसद्भिश्चरित्वेति गुणांतरोपादानात्स्वरूपतः सन्नपि वाक्यभेदः सि
द्धांतसिद्ध्यनुपयोगित्वादुपादेयगुणद्वययुक्तवाक्यमात्राभिप्रायेणैव सिद्धांतहेतुतयोक्तो भाष्ये। आचार्यैश्च मा
सादिवाक्येष्वेव तस्य सिद्धांतसिद्ध्युपयोगो हर्षितो न सार्वत्रिक इति ध्येयं। इति प्रकरणांतरनिष्कर्षे निरूपणं। अथ
मासमग्निहोत्रं जुहोतीत्यत्र कर्मभेदो नैयमिकाग्निहोत्रवत्कर्माभेदो वेति चिन्त्यते। तत्र पूर्वपक्षः। तिस्र आ
हुतीर्जुहोतीत्यादावयं न्यायः स्थितः। यत्र गुणद्वयेन्योन्यविरुद्धे कर्मोत्पत्तिवाक्योपात्ते भेदाहुत्योरन्यतरा
क्षेपमंतरेणाकर्मत्वपोनुपपत्तेस्तत्र भेद एवाक्षिप्यते नाहृतिरिति। मासाग्निहोत्रवाक्ये च नामातिदेशेन परस्प
रविरुद्धं सायंप्रातःकालद्वयं कर्मोत्पत्तिवाक्यगतमस्ति तेन कर्मभेद एवाक्षिप्यते नाहृतिरिति। मासाग्निहो
त्रवाक्ये च नामातिदेशेन परस्परविरुद्धं सायंप्रातःकालद्वयं कर्मोत्पत्तिवाक्यगतमस्ति तेन कर्मभेद एवा
क्षिप्यते यदाग्नेयोष्टाकपाल इत्यत्र पौर्णमास्यमावास्याकालद्वयेनैवेति। अत्रोच्यते। नामातिदेशेनागत

विशेषादभ्यासोपि कालद्वयवत्प्राप्त एवातत आपत्तेनाभ्यासेनैव कालद्वयावयोपपत्तेर्न कर्मभेदा हे
पः। तिष्ठ आहुती र्जुहोती त्यादौ तु नैवकेन विछेदेनाभ्यासउपपत्तेनैव त्रिल संख्योपपन्ना स्यादतस्त
दुपपत्त्यै कर्मभेद एव स्त्विष्यते एवमाग्नेय यवाको ब्यातिहस्तं तद्वयवैषम्यं अथ दानीमिदं चिंत्यते।। मासद
र्शपूर्णमासाभ्यां यजत इत्येत्राज्यमागोपतनीतियदुत्पत्तिसंख्ययाकर्मभेदाद्वैकर्मणोपजिनाविधीयते
इति तावदविवादं तत्र्यादर्शशब्देन पूर्णमासशब्देन च ग्राह्यत्वाग्नेयादित्रसंघेयिद्वि इति कृतं यतो त्रय
मेकैकेनशब्देनैकस्मिन्कर्मण्यतिदिश्यत इत्याप्य विवादं अथ परस्परविरुद्धद्रव्यदेवतादिस
यत्तिकर्त्तव्यतायास्त्रयं उत्पत्तिवाक्यगतं एकैककस्यकर्मणो भेदमापादयति नवेति चिंत्यते तत्र प्र
थमपक्षः। पंचपंचमासम अग्निहोत्रीसत्रेवा भ्यास्ये पादानमास्तितपापि विध्यंताधिकरणे इति कर्त्तव्यता
द्वयसमुच्चयनिरासाधथासोर्पं ग्राह्यताग्नेयकर्मभेदेपि तदीपयोर्णमास्यादिविरुद्धेति कर्त्तव्यतयोर्हि

कल्पेनातिदेशे एवमिहापि विनिगमकाभावाद्दर्शशब्देन पूर्णमासशब्देन च तिस्रस्तिस्र इतिकर्तव्यता आ-
ग्नेयादित्रयसंबंधिन्योतिदिश्यन्ते विकल्पेनैकस्मिन्कर्मणि निवेश्यन्त इति न कर्मभेदः प्रोदा किंतु द्वेधेवेति
त्र्यत्रयम इतिकर्तव्यताविकल्पोप्यमाधे निरस्त एव तथापि मासंदर्शपूर्णमासाभ्यामित्यत्र दर्शश-
ब्देन पूर्णमासशब्देन चैकैकेन लक्षणे नैककशब्दोपादानात्समुच्चये सति आग्नेयवाक्यसमुदायमुद्रितत्वात्
षट्कर्माणि सौर्यत्तु प्राकृताग्नेयेतिकर्तव्यतयोर्न वत्स्येकशब्दोपादानमस्ति येन समुच्चयस्तद्बलात्
कर्मभेदः स्यात् किंतु तत्रैकैकेतिकर्तव्यताकांक्षावशाद्दृष्टकल्पना एकैकेतिकर्तव्यतयैव वाक्यैकदेशप्र-
माणान्तरी दर्शवातिदेशकः शब्दः कल्प्यते पौर्णमास्याग्नेयवद्दर्शोपवद्वेति। एवं वाशब्दप्रुक्तातिदेश-
कशब्दकल्पनान्न प्राकृताग्नेयेतिकर्तव्यतयोः समुच्चयो न वा नद्वावात्कर्मभेदापत्तिरिति षष्ठ्यं।
न चेह पथा पूर्णमासशब्देन वा कर्मत्रयसंबंधीतिकर्तव्यतात्रयं लक्षणयातिदिश्यते इति कर्तव्य-
तात्रयस्य त्रयमप्येकैकशब्दोपादानात्समुच्चयावगतेः षट्कर्माणि एवं सान्नाय्ययागद्वयेन सहाग्ना ७५

क्तामाद्वैकाल्पिकमैंद्राग्रस्यापिद्रव्यदेवतारूपेतिकर्तव्यताप्यग्रह‍तिस्यादर्शेष्टिनलक्षणपैकशेषापत्ते
वेलिसन्नममप्यिकर्मेमासदर्शेष्टिर्णमासमाह्विधियतइतिषट्कर्मानुष्ठानेयाज्ञिकानांचिंतमेवाग्रह
तावैन्द्राग्रविकल्पेपाहतदितीकर्तव्यतायाश्चैकशेषेणगुणविरोधन्यायेनसमप्रधानेप्यनुमयसोख
त्वप्रधर्मत्वमाति न्यायेनसोमप्रालवाधइतिसत्यसक्षमंकर्मैंद्राग्रविकृतिभूतंसिध्यतीतत्स्यानुनित्यंवद
नुष्ठानेदर्शेशशब्दनाम्राप्तिदृष्टस्यप्रकृतिवद्भावस्यबाधःस्यात तथाच वैकाद्दर्शवारुण्यानिष्कासेननुषे
ध्यावभृथंयंतितयत्रप्रकरणांतरात्कर्मांतरत्वेपिनतत्सतिपन्निर्थकर्मभूतसोमिकावभृथवद्भाववाध
पत्तेरितस्तुत्तं।कृतःषट्कर्मानुष्ठानेयाज्ञिकामांपुक्तमेवेतिन्नतुसमुच्चयपावगामकोपदेशेनप्रकृति
वद्भावातिदेशबाधोस्तुमेवं।प्रकृतिवद्भावेनहिप्रधानांगंविकल्पोतिदिष्टः समुच्चयस्तुवैकृतप्रे
कल्प्यःश्वतस्त्विीतिकर्तव्यतापामंगानचत्वांगगुणविरोधन्यायापोदोपदेशिकोपिसमुच्चयस्त्राति
देशिकनापिविकल्पेनबाध्यतइतिप्रकृतिवदेवानुष्ठानंसिद्धंइतिमासाग्निहोत्रमासदर्शपूर्ण

मासवाक्ययोः कर्मभेदाभेदविचारः शाखान्तराधिकरणवार्त्तिके उदितानुदितहोमयोस्तथैवैन्द्राग्नै
कादशकपालद्वादशकपालयोः शाखान्तरीययोः समविकल्पः सर्वोत्रातीतानुक्रांतोऽनन्यमंतेन स्वमत
श्रुतिलिङ्गाधिकरणेनैव विधिबाधनिरूपणेऽस्वयमेव वार्त्तिककृता परशाखाविहितं स्वशाखाविहि
तेन बाध्यत इत्युक्तं युक्तं चैतत् स्वशाखाविहितज्ञानस्य स्वाध्यायाध्ययनजनितस्य कर्माङ्गत्वात्तत्
मवेद्गृहतरस्यानाक्षेपात् स्वशाखाविहितविरुद्धवैकल्पिकानुष्ठानेनापि च साङ्गत्वसंभवात् स्वशा
खाविहिताविरुद्धावैकल्पिकस्य तु ज्ञानं शाखान्तराध्ययनजनितमपि कर्मणः स्वसाद्गुण्याय आक्षिप
त एव एतत्त्रयमूलकमेवेदं भविष्यत्पुराणवचनं यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् विद्वद्भिस
दनुष्ठेयमग्निहोत्रादिकं यथेति इति शाखान्तराधिकरणनिष्कर्षनिरूपणं शेषः परार्थत्वात् ननु परोद्दे
श्यप्रवृत्तिश्शेषत्वमाराध्यते तेनासौ कर्तृव्यतिरिक्तेषु शेषवस्तिः अथ परोद्देश्यप्रवृत्तिविषयत्वं तत्ततो
द्रव्यादौ यागादौ फले च क्रमेण यागफलपुरुषोद्देश्यप्रवृत्तिविषयत्वसत्त्वेऽपि न पुरुषे यागोद्देश्यप्रवृ ७६

त्तिविषयत्वमस्ति किंतु तादृशप्रवृत्त्यधिकरणे तैव तु सत्यमपि वा । अर्थभावनाख्यप्रवृत्तेर्नास्ति । यत्तु म
परत्वमात्मा । यास्तु लोककर्तुः समीहितं येन सिध्यत्यंगं न तु चातद्वृत्य नेनवेधेष्टसाधनत्वमेव शेषत्वलक्षणम्
क्तेतदपि फलेच्छ्रव्याप्तं न हितं तस्येष्टसाधनता विधिना बोध्यत इति उच्यते । प्रवृत्तिः प्रवर्तना । परं चेष्टत्ति उद्देशेन
व पाप्रवर्तना वैधी पाप्रवर्तना लोकिकसाइष्टोद्देश्यकत्वनियमाभावात । साप्रयोजिकासती पारार्थ्यं । प्रयोजक
त्वं च कारणत्वं तत्कारणाद्यनुगतं वैधप्रवर्तनैव स्वसाक्षात्स्वप्रवृत्ते कारणं कांतसंबेधितमिच्छा परोद्देश्यतद्वा
फलस्य । पुरुषस्यापि कर्तृत्वप्रवृत्तिद्वारा प्रवर्तनयैव जन्यते एवं करणत्वेन द्रव्यादिकारकं तत्तरं चेति य
द्वापरोद्देश्यकप्रवृत्तिमत्त्वे वाच्यविवक्षिता तद्वत्ता नियामकश्च संबंधः पुरुषेऽधिकरणताख्यः द्रव्यपागप
लेषु तु विषयताख्यो नान्यो द्वापोरेव लोके तद्वत्ता नियामकत्वात् । न चैवं फलोद्देश्यकयागविषयक
त्याधिकरणत्वात्पुरुषस्य फलप्रत्यंगत्वापत्तिः इष्टापत्तेः सप्तमनवमाध्यायोर्हि सर्वस्यापूर्वे एवमर्थ्यं न
यागस्वरूपमात्रेंगत्वमिस्तुक्त । तेन यथावघातश्चारुणादेर्व्रीहिलक्षितेऽपूर्वसाधनरूपे विशिष्टे वि

७१ नियोगाद्विशेषणे स्वर्गेप्यङ्गत्वमेवमिहायाति। एतत्सर्वमभिप्रेत्य परोद्देशप्रवृत्तिरित्येवोक्तं न तु हि विषय
तात्तदधिकरणत्वेवेति। तदिदमपिप्रवृत्त्यावेद्यामुभिप्रेत्य। तस्माद्बाधेव विवक्षाप्युक्ते निपादिन्यायरत्नमा
लांगतमेवलक्षणं समर्थनीयं तदेवं वाक्यं। पद्युक्तैवेधेष्टसाधनत्वफले ऽव्याप्तेन हितस्येष्टसाधनता वि
धिना वोध्यत इति। तन्नतिस्यापिकालांगतभोगरूपेष्टसाधनत्वस्य वैधत्वात्। स्वर्गादिभोगोपि हि पुंसां स्वर्ग
स्त्रिवदिष्टएव। नन्वेवमपिपुत्रेष्ट्यादिफले पुत्रादावव्याप्तिरेवानहितस्येष्टसाधनत्वे वैधमितिचेत्। नाइष्ट
साधनत्वसमान्यस्यावैधत्वेपि पुत्रेष्टेः कस्यचिदिष्टसाधनता विधिगम्येति स्वर्गकामाधिकरणउक्तं। एवं च सति पु
त्रेष्टेः कस्यचिदिष्टसाधनतां बोध्यता विधिनातस्याः पुत्ररूपस्येष्टस्यकर्तव्यतां विनानुपपत्तेः पुत्ररूपस्यापीष्ट
स्य कस्यचिदिष्टस्य ङ्गसाधनतारूपा कर्तव्यता बोध्यत इति पुत्ररूपस्य फलस्य विसेषत इष्टसाधनता वि
धिगम्यैवेति नाव्याप्तिरिति इति शेषलक्षणं अरुणाधिकरणे वहुव्रीहेरन्यपदार्थेशक्तिरित्युक्तं। अत
श्चदण्डिशब्देन संबंधो वाच्यते पश्यात्तथैव यौगिकैः शब्दैः पिंगाक्षादि पदैरपास्युपक्रमात्। तस्माद्दुपप ७१

स्त्रंपिंगाद्यादीनांद्रव्यवचनत्वमितिवोपसंहारतइंद्रपीतनिपाचस्यपन्यधिकरणद्वयपर्यालोचनात्तुल
क्षणिकोन्यदार्थइतिभातितथाहि।आद्येइंद्रपीतशब्दःसोमविशेषणंतत्पुरुषस्तत्रपूर्वपदार्थमात्रलक्ष
णापन्नेनेवबहुव्रीहिःसवनविशेषणंतत्रपदद्वयेप्यन्यपदार्थलक्षणपतेतितिपूर्वपदितेबहुव्रीहावन्यप
दार्थःशक्यइत्येवोक्तंवाच्यतत्त्वनुरूपउक्ताडुताडुतसमुदायघाविनइंद्रपीतशब्दस्यतदवयवेलक्षणापत्ति
तत्पुरुषेवदतःसिद्धांतिनःपूर्वपक्षमुक्तावबहुव्रीहावन्यपदार्थेलक्षणाभिमतेतिगम्यते।निषादस्थपत्य
धिकरणेचतत्पुरुषात्कर्मधारयवलीयस्त्वेनसिद्धांतितंतत्रबहुव्रीहावन्यपदार्थस्यशक्यत्वेविधाश्रुत
लाघवात्कर्मधारयंहित्वानिषादःस्थपतिर्यस्येत्येवंबहुव्रीह्याश्रयपक्षःपूर्वपक्षःपरावर्ततेति।तत्रलक्षण
पक्षेबहुव्रीहौरक्षणशब्दस्यबहुव्यलक्षकत्वाविशेषेकिंविनिगमकंपदद्वयबहुव्रीहावेवद्रव्यविधापितानारूण
पदस्येति।प्रस्तुतबहुव्रीहौलक्षणायाःसमस्यमानानेकपदालोचनतापेक्षत्वेनविलंबितत्वात्तेनद्रव्यवि
धिःस्यात।किंतुगुणशब्देनैवेतिरूपसाधनद्रव्यनिवेशस्यपूर्वोत्तरपक्षयोःसाम्यात्तदाक्षेपस्यवक्तव्यत्वा

७८ काीपत्तत्सिद्धिः सिद्धांतस्य चापोगादरूणाधिकरणमनुपपन्नं स्यादिति वाच्यं लपदाएवसमंतः।नवलक्ष
78 णान्याप्या।तत्रादि किमाहृतिन्यायोगादरूणा शेषत्वेत्यपंबीजेत्रनन्यलभ्यः शब्दार्थ इति कर्त्रेधिकरण
न्यायोवा।नाधः आहृत्यधिकरणन्यायोहितत्रप्रवर्तते यः शब्दः कदाचिदपि विशेषणमात्रे दृष्टप्रयोगः।तेन
पांचकलसक्तुषक्कुल्मलादिपूद्दानतत्रोदाहरणमित्युक्तं।अतोवङ्क्रीहेरपि विशेषणमात्रे कदाचिदप्यप्र
योगान्नाहृत्तिन्यायइति विशिष्टवाचितैवानद्वितीयः।तत्रापिस्याद्देपोतान्यलभ्यत्वं वा स्याल्लुरूणपाव।न
घः।पिंगात्त्यादौक्वचिदव्यभिचारेणाद्देपसंभवेपिचित्रग्वादौव्यभिचारेणाद्देयापोगात।नद्वितीयनियम
तः शक्तिग्रहापेद्देशब्देनन्यलभ्यो हि शब्दार्थ इति न्यायस्याप्रवृत्तेः।अन्यथापंकजादिपदेपकंभस्यलक्ष
णापत्तीतिसंभवादनन्यलभ्यन्यायादवाच्यता स्यात्तत्रास्तिवचित्रग्वादिवङ्क्रीहेरन्यपदार्थबोधेश
क्तिग्राहापेद्देति।तत्पुरुषेतुनराजसंबंधिनिरानशब्दस्य शक्तिग्रहापेद्दा।यत्विंदूपातनिषादस्थपत्यधि
करणेलोचनाद्दङ्क्रीहेः षष्ठीतत्पुरुषात्कर्मधारयाचेष्टंदौर्बल्यंनसिध्येदित्युक्तं।तन्न।कर्मधारयेता ७८

वधावंतः श्रुतपदार्थास्तावतां वाक्यार्थत्वम् । बहुव्रीहौ त्वेकस्यैवेति दौर्बल्यं षष्ठीतत्पुरुषादौ त्वेकस्यैव ।
न्यपदार्थस्य वाक्यार्थत्वम् । बहुव्रीहौ वर्ण्येकस्यैवेति सामर्थ्यं यद्यपि तत्पुरुषे एकस्यैव त्यागः बहुव्री
हौ त्वनेकत्यागइति दौर्बल्यात् श्रुतसर्वत्वप्रयोगिके ः शब्दे इमे वा विधीयतइति वार्त्तिकं बहूनीतिवष
यमपि न कल्पितमत्र विषयमिति सर्वमनवद्यं गौतमीये निरस्तान्यपदार्थस्येह वाच्यता । बहुव्री
हौ जैमिनीये मते त्विष्टेपपादितं इति बहुव्रीह्यन्यपदार्थवाच्यता निरूपणे यदाग्नेयोष्टाकपालः सोमेन यजे
तच्छ्रूयमाणे कहायनेसादौ विशिष्टविधिरभिमतः तत्रयाति क्वचित्ताधाराग्निहोत्राधिकरणेष्वेषु तिघ्न
रान्यदौर्बल्यं वलो निरस्यता हृष्यणद्रव्यैकात्म्यग्राज्जुहोतीत्यादिगुणमात्रविधौ समानपदोपादानसंनिकृष्ट
धात्वर्थग्रहणासंभवात् विप्रकृष्टग्रहणं च कृते विशिष्टविधौ उभयोर्विशेषणविशेष्ययोर्विधानात्र
यणात्संनिकृष्टविध्यर्थे तत्संभवो विप्रकृष्टविध्यर्थं च तदसंभवोपगन्तव्य इति युगपद्विरुद्धसंभव ।
संभवापत्तिरित्यतः श्रुतेन प्रत्ययेन शुद्धयागं विधायोपपदार्थविधानाय श्रुतप्रत्ययान्तरं कल्प्यते नो ।

त्पत्तिशिष्टवलीयस्त्वं विशिष्टविध्यंगाकारप्रयोजनेन न सिध्यति उत्पत्तिशिष्टगुणपाश्राप्यामिक्षायावा
जिनवदुत्पन्नशिष्टत्वाद्विकल्पायापत्तेः कर्मान्तरविधिर्वाजिनवाक्येन स्यात् । यद्यप्युत्पत्तिचतु
र्हृत्तवलादपि भेदः सिध्येत्तथाप्येंद्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्यादावुभयत्रोत्पत्तिविशि
ष्टेनोत्पत्तिवलीयस्त्वेन विना भेदः सिध्येदिति न्याये वोच्यते । शुद्धस्य कर्मणोऽनुष्ठानाशक्तेर्विधानास
म्भवात्संभवति विशिष्टविधिः । न चैवं चाग्निहोत्रं जुहोतीत्यादौ शुद्धकर्मविध्यसंभवः विध्यनुप
पत्त्यात्तत्रापि उत्पत्तिविधौ सामान्यतद्रूपाभावः तद्व्यसामान्यकल्पितेस्तद्विशेषाकांक्षायां
वाक्यान्तरविहितविशेषलाभेनोपपन्नस्य प्रधानविधेस्तद्विधानलक्षणागीकरणायोगात् । स्ववाक्यो
पात्तेनु विशेषतद्विधानमात्रपर्यवसानोपपत्तेः । यत्तूक्तं संनिकृष्टविधसंभवति विप्रकृ
ष्टार्थविधिरिति । तन्न । तस्योपपदानर्थक्यप्रसक्तिहेतुकत्वात्तदुक्तं प्रसिद्धं वलवत्वेन प्रयाज
नवशेन चात्राधिकृतत्वस्य वृत्तेः स्वगुणरूपं विधीयत इति । अत्र वाजिनादिवदुद्धिदेर्गुणविधित्वम्

योजनवत्त्वंहेतुंवदन्नपिपर्यपर्यवसानेनदृष्टांतेपिव्रीहिविधाववघाततदुपादानानर्थक्यमे
वहेतुरुक्तं। किंचाश्रयाराग्निहोत्राधिकरणेगुणस्यक्रियाद्वारैवविधेयत्वोक्तेर्विशिष्टविध्यर्थे
मपिसन्निकृष्टविधिसंभवएववाच्यःसतुतत्त्वाशोविशिष्टरूपेणावाच्यःअत्राशोनुस्वरूपतएवे
तिनयुगपद्विरुद्धंसन्निकृष्टविधिसंभवासंभवदोषः।नवानेकविशेष्यविशेषणविधानार्थेवि
ध्याहृत्त्यापत्तिः।विशेषणमनुतिष्ठन्नेवहिविशिष्टमनुतिष्ठतिनान्यथेतिविशिष्टविध्यन्यथानुपपत्त्या
विशेषणविधिकल्पनात्।तदुक्तंपूर्णमास्यधिकरणे।विशिष्टायांभावनायामाधापर्यंतंविधित्वंप
घन्यत्रापिस्फुरत्येवपुनर्व्याप्तिमेततःपुनरुच्चरणदोषमवेदिकत्वापत्त्याल्पमेतोत्रपयुनःसकृद्विधायवि
दृत्तव्यापारःस्वार्थान्यथानुपपत्त्यासर्वविशेषणेषुप्रत्येकंनिष्पत्तिविध्यंतराण्यपाविर्भावयन्समाप्ना
यावगतैकरूपापरित्यागेनैवासकृदुच्चारणफलेवर्त्ततइति।विशेषणान्यनुपादायविशेष्येव्यापारा
संभवादितिचाग्रहैकत्वाधिकरणेपिपर्यवसोपुनर्द्रव्यसंख्यालिंगानांभवनांयागंचप्रत्युपादेयत्वादेवेस

रु०

४०

षेण विशिष्टैक भावना विधा मादर्थापत्तिलभ्य विशेषण विध्यंतराविर्भावाच्चैकवाक्यत्वसिद्धिरिति प
रं विशिष्टविध्यन्यथानुपपत्त्या विशेषणविधिषु कल्प्यमानेष्वपि यागादेर्धात्वर्थस्य विशेषणत्वेपि न
तद्विषयो विशेषणविधिः श्रुतेनैव तु प्रत्ययेन धात्वर्थानुरक्तैव भावना विधीयते मत्सुद्धाशब्दोत्तरन्यायात् तत
श्चहुक्तं संबंधि निरूपणाधीन निरूपणः संबंधी तद्रूपेण निरूपणाधीन निरूपणं वद्धा न स्मिवावच्छेदक धात्वर्थ
निरूपणाधीन निरूपणा भावनेति श्रुतायाधात्वर्थं विना निरूपयितुमेवाशक्यासा सुतरां तद्विधिं विना
शुद्धा प्रत्ययेनाक्तापि विधातुमशक्येति श्रुतेनैव विधिना धात्वर्थानुरक्ताया एव विधानात्र धात्वर्थस्
प विशेषण विषयं विध्यंतरं कल्प्यत इति ग्रहैकत्वाधिकरण न्याय सुधायामपि धात्वर्थावच्छिन्नैव भा
वनाप्युल विधि विषय इत्युक्तं । इति विशिष्टविधि निरूपणं विशिष्टविधिष्वपि पत्र सामेन यजेतेत्यादे
तृतीयांतेन द्रव्याधि विधिस्तत्र सामादिद्विप्रातिपदिके सामादि मान्यगोमत्वर्थस्तल्लक्षणास्तिात थाहि
सामादिहि करणत्वेन श्रूयते करणं च कारकत्वात् क्रियायैव संबध्यते नान्येन । क्रियाचात्र फलं भावनैव रु०

प्रत्ययवाच्यानचतस्यासोमादेःकरणत्वंसंभवतिसमानपदोपात्तधात्वर्थविरोधादितिभावार्थाधिक
रणोस्थितानचधात्वर्थेनैवसोमादेःसंबंधःसंभवतितस्यधातुनाप्रत्ययार्थंप्रतिकरणत्वेनोपादाना
त्क्रियारूपत्वयानवगमात्क्रियारूपत्वेवाधात्वर्थस्यप्रत्ययार्थंप्रतिकरणत्वानुपपत्तेः।नचसत्यपि
प्रत्ययन्त्सव्यायाःफलभावनायाधात्वर्थविरोधेर्थात्सिद्धधात्वर्थभावनयासोमादेःसंबंधइतिवाच्यं
तस्याइहाश्रुतत्वात्अश्रुतयाचतयाशब्दांतरस्यान्वयायोगात्।फलभावनाह्यत्राश्रुतानधात्वर्थभाव
नाानचाध्याहृत्यधात्वर्थभावनांतयासोमादेरन्वयःसोमेनभाव्यमाननयागेनेष्टंभावयेदितिविनाध्य
ध्याहारेणवाक्यसमन्वयोपपत्तेःतदवस्यपदत्रप्रत्ययार्थेकरणंयागस्तत्रैवतृतीयातेनसोमादिपदे
नवर्तितव्यंनान्यगतिरस्तितत्रात्यंतनिरूढत्वेनसोमादिपदस्यसामानाधिकरण्यमात्रेणनामत्वा
संभवादर्थांतरवाचिनःसोमादिपदस्यार्थांतरेयागेवृत्तिर्मत्वर्थलक्षणयांगीक्रियतेइति।सेयंमत्वर्थ
लक्षणाविशिष्टविधावेवेतिग्रंथतःप्रतिभाति।उद्भिदधिकरणवार्तिकेहिकर्मणिगुणविधिःफले

८१ गुणविधिर्विशिष्टविधिरूपेण वेति विकल्पस्य त्रिष्वपि पक्षेषु पंच पचदोषा उक्ताः तत्र तृतीयपक्ष एव म
त्वर्थलक्षणादोषउक्तो नेतरयोः॥ शास्त्रदीपिकायामपि। विशिष्टविधिपक्ष एव मत्वर्थलक्षणेति।
81 तेन दध्नेन्द्रियकामस्य जुहुयादित्यादिगुणफलसंबंधेषु यथा धात्वर्थाविधानान्मत्वर्थलक्षणाभिम
ता एवं व्रीहिभिर्यजेतेति कर्मणि गुणविधावपीति केचिदेवमेव सिद्धांतं वर्णयंति। न च धात्वर्थस्य का
रणत्वावगतिर्मत्वर्थलक्षणापादकत्वं वा जनकत्वं करणत्वं च न शब्दाभिहितमस्ति किंतु लाक्षणिकं भावन
य स्वकरणाकांक्षया तल्लक्षणाय जो स्यात्करणाकांक्षाया विधेयाया भावनयोः स्यान्नान्वयमानायाः सोर्थे
भावार्थाधिकरणन्यायः तेन व्रीहिभिर्यजेतेत्यादौ भावनानुवादान्न करणाकांक्षास्तीति न धातुनाथ
त्वर्थः करणत्वेनोच्यते किंतु कर्मत्वेनैव भावार्थाधिकरणन्यायाप्रवृत्तेः धात्वर्थकर्मिकायां च भावनायां
व्रीह्यादेः करणत्वेनैवान्वयो घटत इति न च मत्वर्थलक्षणेति तदप्युक्तं धात्वर्थस्य हि करणत्वं सिध्यति वा ८१
क्यान्तिन वमाघ्रन्यायेन यागस्वरूपे व्रीहिविधिरनर्थक इति माधमांशगुलं चिधानुमव संधात्वर्थः करण

स्विनानुवादितत्वेनालक्षणायेति गुणविधावपि सिद्धा मत्वर्थलक्षणा। तदुक्तं। विधाने वानुवादे वा यागः करणमि
ष्यते इति। विशिष्टविधावस्तु मत्वर्थलक्षणो हि मीमांसार्थाधिकरणन्यायेनातिसुलभत्वात्कृतेति द्वयं इति
मत्वर्थलक्षणा॥ अनुपादेयानि पंचैवेति प्रकरणांतराधिकरणपर्यालोचनया प्रतिभाति। द्वित्वबहुत्वसं
ख्यं वा वेदनाख्यस्याधिकरणेनुपजमानस्यात्मीयकत्वमप्यनुपादेयमित्युक्तं तत्राशङ्क्य हुतांगत्यागन्या
याश्रयत्वे। तदुक्तं पार्थसारथिमिश्रैः। अनुपादेयमेकत्वं यजमानस्य कार्त्तवदिति। अत्र यजमानस्येति पाग
येकत्वस्याश्रयो एकत्वमिति यजमानद्वित्वबहुत्वव्यावृत्तौ। उभयस्थानेषु स्वेष्वप्युक्तिरूपसद्वादशाहत्वव्या
वृत्तौ। एवं ब्राह्मणादिजातिरप्यनुपादेयैव। तदुक्तं द्वितीये आधानाधिकरणे सोमेश्वरेण स्वविधिप्रयुक्तत्वे
नु ब्राह्मणत्वादेः कर्तृविशेषणत्वेपि जातेरनुपादेयत्वादिति जातेरर्थादधिकारिविशेषणत्वावगतेः सि
द्धत्वेन च कामयेत तथाधिकारिविशेषणत्वायोगाद्दाधानस्य च फलाश्रवणे न राजसूयवद्विभिन्नतावपाविरो
धाच्चि पित्रत्वप्रतीतेरिति वा ननु किमिदमनुपादेयत्वं। उच्यते। क्रियते नाप्यपत्वमनुपादेयत्वं तदव्याप्य

८२ त्वं चानुपादेयत्वं। यथा च दर्शादिपंचकं कृत्स्नव्याप्यं भवत्येवं यजमानस्याकीयमेकत्वं ब्राह्मणादि
जातिश्च स्वभावसिद्धत्वाद्भवत्येव कृत्स्नव्याप्यं। तथैवं पशुत्वादिजातिः पश्वेकत्वाद्यपि चानुपादेयं सा
तानातयोः पशुव्यक्तिद्वाराकृतिव्याप्यत्वेनोपादेयत्वात्। यजमानव्यक्तेस्तु स्वकृतव्याप्यत्वात्तद्द्वार
पि न तदीयैकत्वजात्यादितत्कृतिव्याप्यमित्यनुपादेयमेव। आहवनीयविषयोस्तु कृतिव्याप्यत्वेनोपा
देययोरपि सतोर्विध्यन्तरसिद्धयोरेवोपादानात्प्रयोगे विधानं तु प्राप्यत्वमात्रेण यथाशक्ति न्याय
विषयत्वात्। अत एव पदावनीये जुहोतीत्यस्यानुपादेयसंबंधसविधोऽसंनिधिः प्रकरणांतरमित्येतत्त्वा
पावीयपतेप्यतेनस्तु यजमानस्यात्मीयमेकत्वं ब्राह्मण्यादिजातिश्चानुपादेया चेत्तत्संबंधसन्निवे
शाप्यसंनिधिनाप्रकरणांतरत्वाद्भेदः स्यात्। तत्राधारदाहरणं यदाहवनीये जुहोतीत्येवमजात्युदा
हरणमपि सम्यगिति चेत्। न। आहपात्वाभावात्। जुहोतिर्हि साधारणेनानकं विद्धो मत्विशेषं नियमेनो
पस्थापयति पदार्थे इति कर्तव्यतातिदिश्यते। अत एव दर्विहोमान्प्रवृत्त्वाद्दस्तु क्रमस्य मोऽउपदेशा ८२

नास्त्येवास्य नारभ्याधीते तु ब्राह्मणाय जेतेत्यादि अश्रवणे विश्वजिता यजेतेत्यादिवं वदव्यक्तचोदितैश्चेन सिद्धे प्राप्ते
रूपलाभसंभवात्स्वकरणांतरतरतः कर्मभेदः स्प एव। अतो न पंचैवानुपादेयानीति नियम इति सिद्धं इत्यनुपा
देयनिरूपणं॥ प्रवर्ग्याधिकरणे वार्तिककृता निषिद्ध सिद्धा तत्र कः। न प्रथमयज्ञे प्रवृंज्यादिति प्रथमप्रयोगांगप्र
तोयं निषेधः तस्य च प्रतिप्रसवोयं अग्निष्टोमे प्रवृणक्तीति तत्त्वैतन्न हि तो यादिप्रयोगविषयत्वत्र पत्र पत्रवर्ग्यं प्र
प्रवृंजतीति प्रवर्ग्योत्पत्तिविधिनैवानुष्ठानसिद्धेः। अत्र प्रथमप्रयोगे निषिद्धस्य प्रतिप्रसवार्थमिदं। अतस्त
त्र विहितप्रतिषिद्धत्वाद्विकल्प अतिरात्रे प्रथमाहारेत्तविलमकारणमेव चैकल्पिकातिरात्रप्रथमाहारवि
धाने न तत्र निषेधातिदेशाद् अग्निष्टोमसंस्थत्वाभावेन च प्रतिप्रसवानिर्देशादिति तत्र न्यायसुधाकृत दूषण
द्वयमुक्तं दशमे प्रतिषेधः प्रदेशेनारभ्यविधाने च प्राप्ते प्रतिषिद्धत्वाद्विकल्पः स्यादित्यत्रोक्तेन दुर्बलोपि विधि
स्तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवततीति न्यायेन न प्रथमयज्ञे प्रवृंज्यादित्यस्य प्रतिषेधत्वे वैध
प्रवर्ग्यप्रतिषेधबलादेव विकल्पसिद्धेरग्निष्टोमवाक्यानर्थक्यमित्येको दोषः। न प्रथमयज्ञ इत्यस्य प्रतिषेधत्वे

चेति दिक्। तदुक्तादिवाग्निष्टोमप्रथमप्रयोग इवातिरात्रप्रथमाहारेपि विकल्प एवापद्येतेन नित्यमंकरणं सि
द्धिरिति द्वितीयो दोषः। एवं तु समाहितेन प्रथमयज्ञ इति न प्रतिषेधः किंतु पर्युदासो पत्र वर्ण्य षडहं जंतीति प
र्युदासोत्पत्तिवाक्यशेषपर्युदस्तप्रतिप्रसवश्चाग्निष्टोमवाक्यानवकर्तव्यत्वेनोक्तस्य कर्तव्यत्वेनोक्तेः प्रतिप्रसवत्व
त्पर्युदासस्य चाकर्तव्यत्वोत्पत्त्याभावस्य विधिना मेकदेशः स्यादिति सूत्रेण विकल्पापदशमे सिद्धान्तयिष्यमा
णत्वात्पर्युदस्तप्रतिप्रसवो न घटते। अत एवाग्निष्टोम प्रथमप्रयोगे विकल्पोप्यप्रयुक्तः कर्तव्यत्वाकर्तव्य
त्वपोरुदासीनेन पर्युदासन सामान्यविधेर्वृत्तीपादिप्रयोगमात्रविषयत्वेनोपसंहारात्प्रथमप्रयोगे
नु विध्यभावादेवानुष्ठाने प्राप्तेग्निष्टोमप्रयोगे नित्याविधित्वं तत्राप्यनुष्ठानमात्रं सिध्येदिति चेत्।
सत्यमन्यत्र पर्युदासो नैवाकर्तव्यतार्थः तथापीहावश्यं तदर्थत्वमुपेयं। अन्यथाप्रथमप्रयोगे नित्या
नुष्ठानमात्रस्य पर्युदासाग्निष्टोमवाक्यद्वयसाध्यस्यानारभ्यवादेनैव सिद्धेस्तदुभयानर्थक्यं स्यात्। नान्
याजेष्विति वन्नित्यानुष्ठानेन पर्युदासस्य सार्थक्यं तु पुनर्विधिर्व्यर्थः स्यात्। अतोत्र पर्युदासस्याकर्तव्यता ८३

ज्ञार्थत्वात्पुनर्विधिना विकल्पस्तस्यैव प्रतिप्रसवत्वं युक्तमिति। पायि निषेधत्वेति रात्रे विकल्पापत्तिस्तस्मात्स
सापि नाग्रहृतौ सामान्यवाक्यशेषभूतस्य पर्युदासस्यातिरात्रे निर्देशात्प्राप्तेर्नित्यमकरणाद्विकल्पार्थस्य प्र
तिप्रसवस्यानतिदेशादिति तदेतदपि सोमेश्वरमतमयुक्तं। यत्तावदिह पर्युदासोप्यकर्तव्यत्वोपलक्षणार्थ इति क्वाप्य
न्यत्रादृष्टमश्रुतं च कल्पितं। तन्न। एवं हि तत्वाप्यतिरात्रे ग्रहणमाहारेपि विकल्पोपरिहार्यः। यत्तु चोक्तं विकल्पार्थ
स्य प्रतिप्रसवस्यानतिदेशो ग्रिस्याकरणमिति तदपि न। न हि विकल्पः प्रतिप्रसवस्य वाक्यार्थ एव किंतु पर्यु
दासस्याकर्तव्यत्वतात्पर्यनिर्णयद्वारा प्रयोजनं तत्तस्य तात्पर्यग्राहकरणमिति। तदपि न। न हि विकल्पः प्र
तिप्रसवस्य वाक्यार्थ एव किंतु पर्युदासस्याकर्तव्यत्वतात्पर्यनिर्णयद्वारा प्रयोजनं तत्तस्य तात्पर्यग्राहक
स्यानतिदेशेपि तेनाकर्तव्यत्वे गृहीततात्पर्यकतया निर्णीतार्थस्यैव पर्युदासस्यातिदेशादेकस्य च
प्रकृतावकर्तव्यत्वे तात्पर्यविहितोऽनुनेति परस्परविहाने कार्यत्वायोगाद्विकृतावप्यकर्तव्यतासमर्थत्वादतिरा
त्रेपि विकल्पप्रसंगस्तत्रापि दुःपरिहरः। निर्णीतं चैतत्त्रयमेषपकचाधिकरणे। यदुक्त प्रकृतावन्यार्थत्वेन नि

८४ ष्टीतस्य शास्त्रस्य विकल्पतावत्ति देशेन्यार्थे परतानन्यार्थ्येति । तेन पशुदासस्याकर्तव्यत्वोक्त्यर्थत्वेतिरात्रग्रहणो
हारेपि विकल्पापत्तिरपरिहार्या । इतरपशुदासवदकर्तव्यत्वोक्त्यर्थत्वाद्युक्तेत्वग्निष्टोम प्रथमप्रयोगे नित्य
84 तुल्यनापत्ते विकल्पासिद्धिरित्युभयतः पाशारज्जु-अग्निष्टोमवाक्यानर्थक्यापत्तिश्च स्यादिति । नन्वेवं भट्ट
सोमेश्वरमतदूषणेपि वार्त्तिककृन्मते तदुक्तं दूषणद्वयं कथमुद्धर्तव्यमिति चेत । अत्र वद्मः । न शथमयज्ञइ
ति निषेधएव तत्स्य चैवैधक्रियाविषयत्वाद्विकल्पः सिद्ध एव न त्वसावग्निष्टोमवाक्यलभ्यः । एवमपि त्वग्नि
ष्टोमवाक्यानर्थक्यं तादृशाग्निविकल्पोतिरात्रे प्रसज्येतेति भट्टसोमेश्वरोक्तं दूषणमेवं परिहर्तव्यं । अत्रा
ग्निष्टोमवाक्यं परिसंख्यार्थमग्निष्टोमातिरात्रप्रथमाहारयोः प्रसक्तो विकल्पोग्निष्टोम एव नातिरा
त्रप्रथमाहार इति । प्रतिप्रसवोपि च तदाग्निष्टोमवाक्यं भवत्येवमकर्तव्यत्वेन बुद्धस्य कर्तव्यत्वबो
तानं च प्रतिप्रसवत्वं परिसंख्यात्वं च विरुद्धं । यद्वा परिसंख्यैव प्रतिप्रसवसदृशमपूर्वोक्तसादृश्याद्वै ८४
ष्णोच्यते । नन्तु विकल्पपरिसंख्यातिरात्रे नमुष्णतमात्रेणापि निर्वहत्यन्तुनुष्णानमेवेन सिध्येद्दिणा

श्री।

यि चेत्यनुष्ठानमेव न स्यादिति चेन्मैवं। न ह्यत्र विकल्पपरिसंख्याशङ्का। किं त्वग्निष्टोम एव प्रगृह्णा
ति नातिरात्र इति ग्रहणानुष्ठानपरिसंख्या ह्याशङ्कितातिरात्रे तस्यानुष्ठानसिद्धिः। एवं विकल्पपरि
संख्यारीतिः क्वाप्यदृष्टेति वादी ब्रूयात्स्थितिं ब्रूयादेनां। अकर्तव्यत्वाक्षेपे पर्युदासरीतिर्वा क्व दृष्टेति वा
न्यासाच्चैवैवकल्प्यते तत्र सर्वोऽप्यैवैवकल्प्यतद्दूति तुल्ययोः पर्यनुयोगपरिहारो। न चाग्निष्टोम एव प्रगृह्ण
ति नान्यत्रेति परिसंख्यायामतिरात्रद्वितीयादिप्रयोगेष्वपि विकल्पतो तेर्व सर्वत्रैव ग्रहणं न स्यात्।
तत्र वैकल्पिकग्रहणमात्रपरिसंख्यायां सत्यामतिरात्रप्रथमाहारस्थस्यैव प्रयोगस्य पाक्षिक
त्वात्परिसंख्या स्यात्तु चैकल्पिकग्रहणमात्रपरिसंख्यायामेव प्रयोगमस्तीति चेत्तं। त्वज्ञातो ला
घवान्न हि विषयं लाल्येतो अग्निष्टोम एव गृह्णाति नान्यत्रेति हि परिसंख्ययात्र ग्रहणे निवृत्ति
र्बोध्यमानायामतिरात्रप्रथमाहारे विकल्पातिदेशात्पक्षे ग्रहणस्य निवृत्तिः प्रसक्तास्ते चैव पक्षे तत्र
तिसा विहोध्यते ततो लाघवं भवति यत्त्वतिरात्रद्वितीयादिप्रयोगे विकल्पतस्तेषु ग्रहणे निवृत्तिः प

द्वेपि न प्रसक्तानत्वं चेत्परिसंख्यया सा बाध्यते तत्र चात्यंतं गौरवं स्यात्। यद्वा। नियमविधिरेव यातादेरत्र।
८५ क्षिपत्तमेव रूपं प्राक्षिपत्तेरुदास्त एव नियममपि परिसंख्या पञ्चपञ्चनख्येमित्युक्तेरप्राक्षिपत्तस्तमेव रूप
तितस्याक्षिपत्तेरुदास्ते। यथा च व्रीहिनियमो यत्राग्नेयादौ व्रीहयः पक्षे प्राप्तास्तत्रैव तदप्राप्तिपक्षं
पूरयन्प्रवर्त्तते नो यांशुयाजादौ तत्रानुत्पत्तिशिष्टस्य समानविहितस्यापि श्रौवस्य प्राप्तेः पक्षेपि
व्रीहीणामप्राप्तेः लाघवाद्वा विशेषप्रवृत्तस्यापि वाक्यस्य विशेषपरत्वादेशमेतत्। यथावाप
पत्र्येष्वो हिरण्यगर्भः समवर्त्तताग्र इत्याघारयतीति श्रुतमुक्तेरजो हवाघार एव तत्रैवेंद्रकौ
घर इति प्राकृतमंत्रजन्यनियमादृष्टकत्वेल्लोघघातस्य वाघारेनुतत्कथनापत्तेर्गौरवादिति न
वैवमप्येषा प्राप्तपरिसंख्या सा च त्रैदोष्यपरिहारासंभवात् क्वचिदप्यगाह्यतेतिचेत्। न। अस्याः
अपि वस्तुतो प्राप्तपरिसंख्यात्वात्। यथा हि इमामगृभ्णान्रशनामृतस्येत्युदाहरणे पदायव
स्यात्ततो लिंगाद्धि नियोजकवाक्यकल्पनपायर्दभरशनादाने पि मंत्रः प्रभुपादस्याप्तुसत्तो लिं ८५

या कल्प्यमाना कल्पनैव प्रतिषिध्यते एवमत्रापि षष्ठ्यष्टमे प्रकरणे क्लीति परिसंख्यानस्यानन्ते
तिरात्रप्रथमाहारेयत्स्वगर्भग्रहं जंतिन प्रथमयज्ञे प्रत्यज्यादित्यनयोरयोरतिदशाकल्पना हि
कल्पः प्राप्नुयात् अस्यां नु सत्यामतिदेशतिवंधात्रातिरात्रप्रथमाहारे विकल्पो भवतीति सर्वं
निरवद्यं परीपाकाद्वात्स्वयद्युक्तितमं होवार्तिकस्तनातदह्मात्वा सोमेष्वा इह वह्नु स्मान्यथयति त्वस्य
हूष्याहं स्वां प्रकृतिमनयवार्तीकमतं तदह्मात्वाद्ध्यंन विद्धुधजनैर्हविः प्रविसुरवेः इति प्रवर्ग्योपि
करणोद्धारः वाक्याप्रीदान्तं एषा प्रपिष्टनागद्रुत्यत्रानारभ्याधीते सिद्धान्तितं मजपतद्रुक्ति मा
तितत्यत्राम हां त्वा कार्येवाऽनागंशशब्दार्थः एषमत्र देवताधिकरणन्यायेन देवताविग्रहा
दिपंचकनिरासेन महापितत्वस्वीकर्तत्वासंभवाद्दुद्देशेन न्याज्यभागशब्देन लक्षितात
दुक्तं देवता निष्कलानैव पेषणस्य प्रयोजिका । उपादानं च पागस्य भागशब्देन विद्यते पुरव्या
र्या संभावाद्यागलिङ्गहपिपद्यात्रहि । अपतेभागशब्दो येनानुपादानमसत् इति तत्र चोद

प. द्वि. ८६

यतिक्रे धलस्पृष्टोद्देशेन प्रपिष्टतानेि विधेयाज्जुह्वादिवत्पृष्ट्यः कर्तव्य मिचाराभावेन कर्तत्वमुपस्था
नेनानर्थक्याघातात् नच यागमात्रोद्देशेन प्रपिष्टता विधिः नित्यधत्स्पृष्टोनुवादस्यप्रोक्षमावे
नायोगात् । अतो न पूर्णयाग विशिष्टस्पृष्टोद्देशेन स्पृष्टविशिष्टयागोद्देशेन वा प्रपिष्टता विधेया तत्र
च विशिष्टस्यानुवाददोषः तथा मयरं स एव किंतु अग्नेः स्विष्टकृतं पजति सष्टकं तुः प्रथम भक्तइत्या
दा विवेकस्मिन्नप्राप्यदेवत्वरपदार्थोद्देशात्सर्वे पदार्थे विधेश्च कप्रसक्त्याभावात्समासविघातो
पि स्यात् । नच पद्गृयेच प्रजापतये घसायेजुहोति त्याहैन्द्रैमेव सान्नप्रविष्टमादधीयाता मित्यत्र
यथा समममनुवादेन वसनानुवादेन च देवतायाः द्रैमस्पच विधौ प्रकरणप्रयोज्जुहोत्या धान
योरनुवादाद्धि विशिष्टानुवाददोषपरिहार एवं स्पृष्टवाक्ये संभवति अप्रकरणप्राप्तविहितत्वात्तस्मा
दिह विशिष्टानुवादकृतवाक्यभेदस्य कः परिहार इति । अत्र कृपपथा लोहितो ष्णीषा ऋत्विजः प्रच
रंतात्सुष्णीषमगतमेव लोहितं कर्तृत्विजउद्दिश्य विधीयते अन्यथा गोरिकादिना सा तदेव र्त्विजां ले

प. द्वि.

हित्यकरणं प्रसज्येत तास समासोपात्त विशिष्टार्थे विधौ वाक्यभेदश्च नास्ति लौहित्यमात्रपरश्च विधिर्भ
वति उसीषिणः प्रचरन्तीति उष्णीषप्रदेशेन यथा वा एकं सामतृचे क्रियते स्तोत्रीयामित्यत्रापि स्तोत्री
द्देशेन ऋगासमेव त्रित्वं विधीयते अन्यथा स्तोत्र एव साम्नाहावित्व विधायपत्ते स्तोत्रीयाणि स्तोत्रीयाणि
येत्याप्यस्यपि पञ्चस्तोत्रीयाणमुत्पत्तावेकत्वं निरधारालथाप्याहत्त्येयं त्रित्वं संख्यासंयाघेना स्तोत्रा
त्तिश्च नर्गोहत्तिं विनोपपद्यत इत्युगाहत्तिरेव साव्लितिस्वमवः तस्माद्यादशात्रागानात्रित्वसंख्या
समासात्पतीपतेनाहश्येव विधीयते संख्यामात्रपरश्च विधिर्भवति एवं रूपवाक्येपि भागसमाज्यं
हविरितिपावतत्तश्च समासावगतहविर्गतमेव पेषणं पूषोद्देशेन विधीयते पेषणमात्रपर
श्च विधिर्भवति न च हविर्गतं पेषणं मद्देवतासमूतं पुरूषिह विरभावाच्च कांकरलुहवतान्दत्र
एवेति पूषा देवताद्देशेन पेषणं देवतासमूलं एव हविषि पेषणं विधीयते तज्ज्यत न विशिष्टानुवाददोषानै
वसमासवैरूप्यदोषइतिसर्वसुस्थं इति पूषाधिकरणसिद्धान्तात्तेपपरिहारः इहच चिह्निशि

८७ स्यस्यतादर्थ्ये विशेषणस्यापि तादर्थ्यं भवति यथा निर्मथ्येनेष्टकाः पचंतीति मथनस्यापि पाकां
गत्वं एवं दर्शापविरेण ग्रहं संमार्ष्टीत्यत्रापि किंचिद्विशिष्टस्य तादर्थ्येपि न विशेषणस्य तादृ
र्थ्यं संमतं यथाभिक्रमणं सप्रयाजादिदेवतामंत्राणां च प्रयाजमात्रांगत्वं न दर्शांगत्वमिति । त
त्र किं वैषम्यबीजं तत्रेह किंचिद्विशिष्टं प्रति तादर्थ्ये विशेषणं प्रत्यपि तादर्थ्यमिष्यते यथा वध
तस्य दर्शे एवं साधनीभूतेषु व्रीहिषु विनियोगाद्दर्शाद्यंगतापि किंचित्तु विशिष्टं प्रत्यपि
तादर्थ्ये विशेषणं प्रति न तादर्थ्यमिष्यते यथा येनानं प्रति स्वाध्यायस्याध्ययनस्य वा तादर्थ्येपि न
विशेषणमर्थकर्मे प्रति तादर्थ्यमिष्यते । एवमष्टवर्षं ब्राह्मणमुपनयीत तेन पयसि दध्यानयति
स्युपनयनदध्यानयनयोः क्रमेणाष्टवर्षं विशिष्टं ब्राह्मणं प्रति तापवीशिष्टं पयश्च प्रति त
दर्थ्येपि न विशेषणीभूतान्यष्टसंख्यानि वर्षाणि ब्रह्मस्तु पनयनस्य तापं च प्रति दध्यानयनस्य तादर्थ्यं
मिष्यते तत्रापि किं वैषम्यबीजमिति । अत्र ब्रूमः । ऐंद्राग्नदर्शापविद्भयोर्वाक्योपसंयोगाहाहपत्यग्र ८७

हार्थत्वं यथाक्रममस्मिन्मते। एवं सोमस्य यागस्वरूपोत्पत्त्यर्थत्वादपूर्वसाधनं विधानादपूर्वविशेषत्वं
वाक्यात्। एवं सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादौ वाक्यसंयोगाद्द्रव्यस्य फलशेषत्वम्। अत एव सो
मादीनां फलभावनेतिकर्तव्यतात्वमुक्तं सप्तमाद्यादौ। सोमस्य तु फलं नानाकरणत्वमाधारादग्निहोत्रा
धिकरणे उक्तं। न च करणत्वमितिकर्तव्यतात्वं चोक्तस्य विरुद्धं करणस्यैव सतो यागोपकारकत्वेनेति
कर्तव्यत्वात् तदुक्तं। न हि तत्करणं लोके वेदे वा किंचिदादृष्टं। इतिकर्तव्यता साध्योपस्यानुग्रहे हि
तरिति। तस्मादिष्टौ दर्शाद्यविनसोमादीनामुपस्थानादिकरणकगार्हपत्यादिकर्मकभावनेतिकर्तव्यतात्वं
द्रव्यभूतगार्हपत्याद्यर्थतापि वाक्यादुक्ता। अभिक्रमणप्रयाजद्रव्यदेवतामंत्राणां तु प्रयाजकरणकभाव
नात्रेतिकर्तव्यतात्वमवांतरप्रकरणेन प्रयाजमात्रस्य। दर्शादिभिर्न वाक्यीयः संयोगो दार्शादिभिरस्ति दर्शेतिक
र्तव्यताकांक्षात्मके न तु प्रकरणेन प्रयाजमात्रस्य ग्रहणमिति न विशिष्टस्य तत्र विनियोगे प्रमाणमस्तीति
न विशेषणानां दर्शाङ्गत्वमिति वैषम्यम्। एवमेवावघातादेर्दर्शप्रकरणात्तदङ्गव्रीह्यादौ विनियोगात्तद

८९ सर्वांगतापुरुषाध्ययनस्य त्वर्थज्ञानांगत्वप्यर्थमूतकर्मेश्वकरणाभावात्रतदंगते स्यात्तापाष्टवर्षादे
१९६ स्तु ग्रहगार्हपत्यपल्कचिद्धिनियोगाभावेनवासोयसंयोगेसत्यपिनतदंगत्वमुपनपनदध्यात्ययनयोरिति
ब्राह्मणत्वजातिवदुद्देश्यतावच्छेदकेतैवनतदुद्देश्यतापेक्षार्थोपस्थितिश्चभावतातिथेषमयमिति।नन्वेवमुद्देश्य
विशेषणविवक्षायांवाक्यभेदःस्यात्।मतयमुद्देश्यतादशायामविवक्षितमेवविशेषणंअनंतरवाक्ये
तुतमध्यापयीतेतिमांवेमदव्यामितेतितदुद्देनोपनयनसंस्कृताष्टवर्षब्राह्मणस्यदध्यानपनसंस्कृत
ततश्चयसच्चपरामर्शेनोपादेयत्वाद्विशेषणविवक्षासिद्धिः।एवंयस्यपितापितामहोवानसोमंपिबे
शा त्सब्रात्यइत्यत्रापितच्छद्देनैकेनेभयपरामर्शात्।नचाष्टवर्षब्राह्मणतद्यमुपेत्समेवेति।ननुसततदशैवे
प्रजापतिरित्यत्रहिसन्नेतत्प्रसंगेसतिसामातविधायोगात्कथंप्रत्युदाहरणंतवंवार्तिककृतोक्तंउच्यते
तदर्थशास्त्राद्वाविवात्रानर्थक्यपरिहारःप्रस्तौवाहिरुक्तात्वादित्यधिकरणएवेयम्प्रयोजनेकार्षस्य
मर्णतादावप्येवमेवतदुद्धारःसुधरः।अतश्चप्राप्तिकालेवैषम्यमेवात्रमुख्योहेतुःसिद्धांतसिद्धेः।हिरुक्ता ८८

ताश्च संगमस्त्वनुच्चयहेतुरेवान्यथा हि संशय एव स्यात् किमतिदेशाभ्युपगमे भट्टिरूक्ततारव्यमानर्थे
क्यं परिदर्शितं किं वातिदेशेन शास्यमानस्यापि पर्णतादेः सर्वपक्षप्रयोजनरूपश्चायश्चित्तविशेषशास्यम
नस्याप्यर्थस्य पुनर्विधिः प्रयोजनविशेषणं। अग्रेरुव्याशीतमुवप्येनेत्यादिना। गवामयते चाग्नेयोरग्न
रैन्द्रवायवाग्रता विधिना। भागधर्मत्वान्वाख्यमानायामैन्द्रवायवाग्रतायाः। तथा तदर्थशास्त्रतायामपि लिंग।
त्वख्यमानस्य मंत्रस्यात तथा ज्योतिष्टोमादौ सार्वकाम्यश्रावस्य स्वर्गार्थत्वस्य एव मायात्तेनार्थवादेन विधि
तश्चातिदेश्यमानस्यापि प्राशस्त्यस्य स्तंत्र स्यात् तथा ज्योतिष्टोमः। एवमन्त्राश्रितस्यात्वाशि कालवेषम्यमे
वसंप्रापापन पापे पापस्य प्रकृतौ वाविरूक्तत्वाविरूपत्रे ति निष्कर्षः। अथैतदधिकरणे प्रयोजनमनेमुद्ग्रे
त्यते। निधीयते। यद्यपि को र्थः सामान विधेयत्गुण कामप्रवर्तननिमित्तम्नत्राङ्कतयापि तच्चयनादि कि
यायामेव युज्यते तदाश्रितगुणकामसंभवात् पर्णत्वादिजातेस्तु क्रियात्वेन तदाश्रितगुणकामोनसंभ
वति। अतः प्रयोजनान्तरं वाच्यं। तच्चएवं पक्षेपर्णत्वादीनमुपदिश्य विशेषणात तल्लोपे प्रकृतौ विहृतौ

चप्रायश्चित्तसामान्यसिद्धांतेतत्प्रदिश्यतिदिश्यर्थेऽपिप्रायश्चित्तविशेषइतिभवदेवः।तन्नानह्युपदिश्या
तिदिश्ययोर्द्वयोर्विषेप्रायश्चित्तविशेषः क्वाप्याम्नातोदृश्यते।अतःप्रयोजनंवाच्यं।तदुच्यते।वाक्यादौ
उच्चैर्ऋग्वाक्रियतइत्यादिस्वरस्यपर्युक्तोपञ्चआर्तिमिपाङ्ः स्वाहेतिगार्हपत्येजुहुयादित्यादिनेमित्तिक
प्रायश्चित्तस्यचवैदधर्मत्वमुक्तं।ततोद्वितीयाधिकरणेउत्पत्तिवदनिवंधनमिदमुभयमिपूर्वपक्षितेसि
द्धांतितंविनियोगविधिनिवंधनमुभयंकाण्वेदाविनायद्वि नियुज्यतेतत्रोच्चैस्त्वादितस्यैवऋगात्तोप्रा
यश्चित्तमितितत्रयाजुर्वैदिकोऽज्योतिष्टोमात्तद्विकृतौसामवेदिकेश्येनेपादिरुणीपादीक्ष
यःस्यागविशिष्टंश्रुतिदिष्टत्वपियाजुह्वस्तत्राप्यपूर्णतात्रात्यपूर्वपक्षेयाजुर्वैदिकविधिविनि
युक्तेतितद्धेषयाजुर्वैदिकांगद्वेषप्रायश्चित्तंकार्यंसिद्धांतेतुतस्याःप्रकृतौयाजुर्वैदिकविधिविनियुक्तत्वेपि
श्येनेसामवैदिकातिदेशविनीयुक्तत्वसामवेदिकांगद्वेषप्रायश्चित्तानचोहादीनाम्नानाम्नानादमंत्रत्व
मिवातिदेशस्यवरत्वंऊहप्रवरनामधेयमंत्रत्वमित्यत्रैवहादमुक्तं।अवदानादिविधोद्वादिपदवद्विश्वधि ८९

होदोफलपदवत्सौर्यादावतिदेशेवद्बहादेरपिश्रुतार्थापत्तिकल्पस्यऋर्थाद्वाक्यत्वानैकदेशत्वाद्विवेतिवे
वैकदेशत्वोक्तेर्वेदत्वाभ्युपगमेपिमंत्रेब्राह्मणमित्युक्तौद्वैराश्यंप्रसक्तेर्वेदस्यैवनकल्पस्येतिप्रसंगाद्वाकुमेतद
धिकरणमिति॥ ॥इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्भट्टनारा
रायणात्मजशंकरकृतेमीमांसाबालप्रकाशेतृतीयाध्यायार्थसंग्रहः चतुर्थेप्रयोजकाप्रयोजकौनि
रूपितौ।तत्रप्रयोजकोपिसप्तधा।अप्रयोजकोपिसप्तधा।तथाहि।कश्चिदुत्पत्तेरपिप्रयोजकउपादानस्या
पिपालनस्यापि।यथाग्नेययागस्यभित्त्वापागाहिरपिथात्ममष्टाकपालमित्यादेः।कश्चित्तूत्पत्तस्याप्यप्रयो
जकोपयथातुषोपवापः।कपालस्यनोत्पत्तेः।प्रयोजकोनोपादानस्यनचपालनस्यसत्तुपुरोडाशार्थ
मेवोत्पन्नमुपात्तंपालितंचकपालंसाधनत्वेनगृह्णाति।कश्चित्तुउत्पत्तेरप्रयोजकउपादानपाल
नयोस्तुप्रयोजकःयथाग्न्याधानजननेनधार्यस्तुनामुत्पत्तेःप्रयोजकंस्वतएवदत्यन्नासिद्धत्वानात्तेषोपदग्रहण
रूपोपादानस्यप्रयोजकंपालनस्यच।एवंप्रातर्दोहपागोपिअग्नितपातोत्पत्तस्यैवाधःस्थितदुग्धस्यदोहन

त्पत्तेः प्रयोजिका नोपादानपालनयोः। एवं स्वर्गादिफलं पशो॥३

६० रूपशुपादानं पालनं च प्रयुंक्ते। वाजिनयागोपि वाजिनोत्पत्तेः प्रयोजकस्तस्यामिक्षार्थदध्यानयनार्थ
नत्वात्। वाजिनोपादानपालनयोस्तु प्रयोजक एव। कश्चित्तूत्पत्तेरेव प्रयोजको नोपादानपालनयोः पर्य
90 मिक्षा वाजिनोत्पत्तेरेव प्रयोजकं न यागोपादानपालनयोः उत्पत्तिव्यतिरिक्तयागोपादानासंभवात्।
सत्त्विकस्य च पालनासंभवात्। कश्चित्तूत्पत्त्युपादानयोर्न प्रयोजकः पालनमात्रस्य तु प्रयोजकः। पश्चा
त्विष्टकृद्यागादिः शेषस्य। कश्चित्तूपादानस्यैव प्रयोजको नोत्पत्तिपालनयोः पर्यायाग्राविणासक्षमपदनि
ह्यायंजनमसंस्कृतपांसूपादानस्यैव प्रयोजकं न पांसूत्पत्तिपालनयोः। एवं चरोस्तुषोपवापोहस्तोप
दानस्यैव प्रयोजको न तदुत्पत्तेः पालनस्य वा। एव प्रयाजमग्रेयादिर्यागो देवतायष्टुर्दृष्टात्मकोपादानस्यै
व प्रयोजको न देवतोत्पत्तेस्तत्पालनस्य वा। कश्चित्तूत्पत्तिपालनयोरेव प्रयोजको न तूपादानस्य। यथा
स्वर्गादिफलमपूर्वस्योत्पत्तेः प्रयोजकं पालनस्यापि धर्मनाशककर्मनाशकैः जनस्पर्शादौ हि कृते स्वर्गो नु ६०
त्पत्तेः। न तूत्पत्तिव्यतिरिक्तं किंचिदस्यापूर्वस्योपादानं पशुर्वर्गादिना फलेन प्रयुज्येत। कश्चित्तूत्पत्त्युपादानयो

रेव प्रयोजकः न पालनस्याय यागीषोमीयविकारे निरूढपशौ च सति दाक्षिते मैत्रावरुणाय दण्डप्रदा
नं दण्डोत्पत्त्युपादानयोः प्रयोजकं न तत्पालनस्य पूर्वमविद्यमानत्वात्तस्येति एवं प्रयोजकोऽप्याद्यभेद
स्य तृतीयादिभेदानां च गणनया पञ्चविधः। अप्रयोजकोऽपि द्वितीयस्य तृतीयादिभेदानां नानां च गण
नया सप्तविध इति सिद्धं। पुनरपि प्रयोजको द्विविधः कश्चित्स्वार्थे प्रयुक्तो यथाग्नीषोमीयस्व गादिः शीर्षप
गादिकं स्वार्थे प्रयुक्तो न परार्थे। कश्चित्तु परार्थे किंतु पापं तत्पकृत्युपकारादि वित्प्रयुक्तो न स्वार्थे यथा
निमित्तं जीवनभेदनादिस्त्रशेषिभूतं तद्पूर्णाहिकं भेदनहोमादिकं च न स्वार्थे प्रयुक्तं किंतु पापत्त्वपक
त्वपकारादिशेष्यर्थे प्रयुक्तो। तदुक्तं भावार्थैः तथा होमाः प्रयुज्यन्ते भेदनस्कन्दनादिभिः। निमित्तैर्नैव
ते धर्मा होमानां शेषता मतेति। अप्रयोजकोऽपि पुनर्द्विधा यथा कश्चित्स्वांगस्याप्यप्रयोजको यथा
दोषपयाघः कपालस्य स्वांगभूतस्याप्यप्रयोजकः। कश्चित्तु परागंस्य स्वोपकारिणोऽप्यप्रयोजकः यथा
यादध्यानयनस्य वाजिनयागः यथा वा दोहव्यंजनं एकहायमानयनसाध्यमपि न तस्य प्रयोजकः। यथा

९१ नाशवियत्ति: शकलेऽहितनिरसनस्विष्टकृद्याग्चात्वानप्राशनादि: प्रतिपाद्यस्य शकलेऽहितस्य शेषस्य कृत्स
विधाणादेस्याप्रयोजकाः तथात्र संग्यपिपशुपुरोडाशयागादि: यस्यांगस्य प्रयाजादे: स्वोपकारिणोप्रयो
जकः अप्रयोजकाद्विलक्षणे भाव्ये साधारणे मेव तंत्रं पारार्थ्येत्व प्रयोजकः एवमेव प्रसंगः स्याद्विद्यमाने स्वके
विधाविति अस्यार्थः साधारण्यं अनेकेषां पत्र प्रयोजकत्वशक्तिरस्ति तत्र तंत्रं यथा प्रयाजादेः सकृदनुष्ठा
नं तद्विषयाद्येनेकेषामाग्नेयादीनां प्रयोजकत्वशक्तिरस्ति परार्थत्वप्रयोजकः अत्र परार्थ्ये परमात्रार्थ
इत्यर्थः अन्यथा तंत्रे ऽतिप्रसंगात एवमपि पुरोडाशकपालेष्वव्याप्तिः कपालेष्वप्रपत्तीति सप्तम्या पर
स्मिन्प्रयाणइव कपालानां पुरोडाशकपालेनेति तृतीयया तु षोपचीयपिपितादर्थात अतः परार्थ इत्यस्य
परमात्र प्रयुक्त इत्यर्थः एवमेव प्रसंगः स्यादित्युक्तेक स्तस्य प्रयोजकसंगयोर्भेदइत्यत उक्तं विद्यमाने
स्वके विधाविति यद्यपि महत्न्यपि पशुपुरोडाशे प्रसंगोपकारि प्रयाजादिरभंगत्वात्तदंशे पुरोडाशो यो
तिदेश: प्रयोगवचनश्चतुष्यतेतथापिपि ष्टलेपफलीकरणाज्यभागादि साधारण्येन तावत्प्रयाजादिष्व ९१

युक्तिसमर्थो विधिरस्ति वा कथं तर्हि ज्योतिष्टोमादिकर्मणा जिनादिविधिस्तु वाजिनाद्येव विषयीकरोतीति न
च तस्य तत्र प्रयोजकशक्तिरस्ति अन्यत्तु किंचिन्न वासौ विषयीकरोतीति वैषम्यमित्यर्थः । अत्रैवार्थे द्वादशा
ध्यायाद्यभाष्यगतस्य तत श्लोकव्याख्यानग्रंथस्य तात्पर्यं वर्णनीयं । इति तत्र प्रसंगात्प्रयोजकलक्षणं निरूप
णे चतुर्थे प्रयाजशेषाभिधारणाधिकरणे किंचिदुच्यते । चतुर्जुहोति गृह्णातीति प्रयाजेभ्यस्तदिति प्रयाजार्थं
चतुर्गृहीतं । चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य शिरः प्राचीनं प्रयाजानयजतीत्यनेन प्रयाजत्वेनोपसं
हृतं तेन जुहूर्जुहोतीति होमे विहिते कृत्स्नमेव होतव्यं । ननु प्रयाजशेषाभिधारणरूपप्रतिपत्त्यनुरो
धेनाकृत्स्नहोमः स्यात् । न प्रतिपत्तीनामप्रयोजकत्वात् । तासां चात्यन्ताप्रयोजकत्वमेव तासां नास्ति धारणप्र
योजकत्वं नु तासामस्त्विति वाच्यं । अधिकरणचतुष्टयविरोधात् । तथा हि सोमेऽवचनादिडो न विधेः
इति पूर्वपक्षितेऽग्रहे जुहोति च मसे जुहोतीति सर्वहोमप्राप्तावपि अल्पं जुहोतीति वचनेन सिद्धान्तितं
हि कृत्स्नत्व अकृत्स्नहोमस्य न्यायप्राप्तत्वे तत्स्ववाक्यस्य विधित्वायोगात् । तासां आज्यभागसर्वसंयोगाद्वि

९२ त्वत्रचतुर्गृहीतंजुहोतीतिध्रुवाज्याद्गृहीतेनचतुर्गृहीतेनोपांशुयाजेकृतेपिशेषकार्यानुरोधेनशेषःस्यादि
तितदधिकरणविरोधः।एवंसक्तुप्रसादाद्येस्विष्टकृदिडंचतद्वत्‌सौत्रामण्यांचग्रहेष्विष्टत्वनयोरप्यधिक
रणयोःसिद्धांतौस्तुद्धृतौस्याताम्।किंचनकेवलंसिद्धांतविरोधएवकिंतुप्रतिपत्तीनांप्रतिपाद्यप्रयोजक
त्वायोगरूपन्यायेनयथाप्रतिपाद्योत्पत्तिप्रयोजकत्वाभावःसिध्यत्येवंप्रतिपाद्यस्यशास्त्रतःकृत्स्नहोमेषु
ष्टेतद्वारणाप्रयोजकत्वमपिसिध्यत्येव।तदुक्तंसोमेवचनेोहित्याधिकरणेशास्त्रदीपिकायां।अथशेषकौ
र्यंचशास्त्रेत्यंततस्तेषामपिप्रयोजकत्वाच्छेषनाशदोषापहाराद्यवपिहविरंतरागमःस्यादितितस्मा
दल्पंजुहोतीत्यादिवचनाभावाज्जौहवस्यप्रयाजत्रयेणकृत्स्नहोमात्प्रयाजशेषएवनास्तीतिप्रयाज
शेषाभिघारणाधिकरणमनुपपन्नं।अत्रब्रूमःकृत्स्नाचितैवेतिकेश्चिदपिग्रंथकारैरनुक्तमपिकल्प
नीयं।यद्वाकृत्स्नहोमेशास्त्रतःप्राप्तेयदिप्रमादात्सशेषंजुहोमीतितततइयंशेषस्यप्रतिपत्तिर्विधीयते
इतिनित्यवद्धाम्नानमंगेनकल्पनीयं।प्रतिपत्तिविधिनवचकृत्स्नहोमाभावकृतवैगुण्यप्रतिसमाधि ९२
त्सापिनिवर्ततइतिप्रयाजशेषाभिघारणाधिकरणसमाप्तिः॥चतुर्थाध्यायाद्यपादस्याधिकरणं६

नारभ्याधीतं चतुर्गृहीतं जुहोतीति वाक्यं सिद्धांतसाधकत्वेनोपन्यस्तं चतुर्गृहीतं जुहोतीति स्व
नारभ्याधीतेन होमांगं चतुर्गृहीतं प्राप्तेनानुपपन्नमिति गृह्णाति प्रयाजानुयाजेभ्यस्तदिति होमांग
भूतग्रहणांगत्वेनाप्यसंख्याबाधिता चतुष्ट्वद्वयलक्षणा येति तदनुपपन्नं चतुर्गृहीतं जुहोतीति
विहिहोमाद्यनुवादेन चतुर्गृहीतं विधीयते न च प्रयाजानुयाजयोर्होमकेनेति वाच्यं एवमात्मभागयोरुपांशुयाजे
च होमस्याप्राप्तेन चतुर्गृहीतं विधीयते । अथ चतुर्गृहीतं जुहोतीति चतुर्गृहीतविशिष्टहोमविधिरि
त्युच्यते । तदप्यनुपपन्नं न ह्यत्र दर्शयागादि किंचिदनूदितं न वा यस्य पर्णमयी जुहूरित्यादिवत्कर्मव्यभि
चारि किंचिद्द्वारमनूद्य होमविधानं तेन कर्मांगत्वे वास्य होमस्य न स्यात् । किंतु विश्वजिद्वत्कल्प्यफलत्वं स्या
त्तमेवेदं होमांतरमापद्येत । अत्र होमं तं चतुर्गृहीतमिति द्वितीयाबलात्तदनूद्य तत्संस्कारकत्वेन प्रतिप
त्तिरूपतो होमो विधीयते । चतुर्गृहीतस्य होमांगत्वोक्तिस्तु तत्र तत्र होमोपकारत्वमात्राभिप्रायेणेत्ये
तदप्यनुक्तं । एवमप्यस्यानारभ्याधीतत्वाच्चतुर्गृहीतस्य भोजनादौ लोकेऽपि संभवात् त्रिवर्णापालंभकत्व

९३ वैदिककर्मागत्वचतुर्गृहीतोपस्थितिरस्तीनास्यहोमस्यत्वपाजाद्यंगतासिध्येत । अथ चतुर्गृहीतस्यहोमां
गतात्क्रिवदनारभ्यवादत्वोक्तिर्नोद्भियतेततोस्तुनामकर्मागाचतुर्गृहीतोपस्थितिस्तथापिपत्रचतुर्गृ
हीतंविहितमस्तिचतुरुद्धं गृह्णातिप्रयाजेभ्यस्तदित्यत्रतत्रैवविवेवचतुर्गृहीतात्त्रैपणहोमविधु
पपद्यतेनोपांशुयाजाज्यभागादौचतुर्गृहीतात्त्रैपाहोमविधिनोपपद्यते । स्रुद्भस्यविधानादेयवत्कर्मभिः
पुतेनेदमपिनिरस्तंयथाध्ययनस्यस्वाध्यायोध्येतव्यविधिरेवसामर्थ्यदृष्टार्थत्वसनाथःस्वाध्यायस्य
र्थज्ञानेविनियोगमाक्षिपतियथावाचरुमुपदधातीतिचर्वर्थोपधानविधिरेवसामर्थ्यदृष्टार्थत
प्रकरणेश्रुतेरेवंहोमोस्तुपांशुयाजार्थसन्निधानस्यचतुर्गृहीतस्योपांशुयाजार्थतामाक्षिपती
ति । अथमतंउपांशुयाजाज्यभागादिष्वपिध्रौवचतुर्गृहीतमंगमस्तीतितदन्यैवहोमविधिरर्थं
वमपेक्षतेचतुर्गृहीतस्यानेनविधिभावात्प्रयत्नस्यचतुष्कद्वयलक्षणार्थतासिध्येत । किंचैवंसतिउपां
शुयाजादौध्रौवस्यैवैकदेशसम्भेदेचतुर्द्धागृहीत्वातस्मानयनेचतुर्त्वपरंचतुर्गृहीतंसिद्ध्येत । अर्थैवमे ९३

तद्धोमद्वयोरोभिमतः। अतोपभृते होमेस्यैवाभिद्धे नैहोममन्त्रेषु चतुर्गृहीते विधीयते किंतु चतुर्गृहीतेनि
मन्त्रेषु होमो विधेयस्तत्र वाक्योन्यास्त्रयायतिः। अतएव त्वेन चतुर्द्दयलक्षणायां समन्याप्राप्तं चतुर्गृहीतमन्त्रेषु हो
मो विधेयः होमविधौ वक्तव्यांगत्वनिर्वाहाय चतुर्गृहीतस्यादेपतः प्राप्तौ तल्लक्षणाण्त्वेनेति। अतः समा
नयनदृष्टार्थत्वादेवोपभृते होमप्राप्तौ चतुर्गृहीतविधिरित्याधदोगाद्धोमानुवादेनैव चतुर्गृहीते विधे
यमिति। एतद्दृष्यास्तुक्तेः। पांसुपाजादोमाप्राप्तेरेव। किं च पदुक्तं ध्रौवैकदेशस्य चतुर्गृहीकत्वाभावादिति तत्त
दपि न प्राप्तानप्रयाजत्रयविषयजौहवेपि चतुर्गृहीतेकदेशस्यैव चतुर्गृहीतशब्देन लक्षणयोक्तेस्तद्वदेव
ध्रौवेपि संभवात्। एवमप्यौपभृते चतुर्गृहीतस्यानेन विध्यभावादन्नाप्त्वस्य चतुर्द्दयलक्षणार्थता सि
ध्येदिति दोषः पूर्वोक्तः स्यादेव। किं चैवं ध्रौवाज्यादुपांशुयाजाद्यर्थं चतुर्गृहीतेन सिध्येदित्यपि पूर्वोक्त
दोषः प्रसज्येत। यदि च तत्र कृत्स्नचतुर्गृहीतसंस्कारकहोमसंगत्वानुपपत्त्या चतुर्गृहीतप्रतिहोममाक्षि
प्येत ततः प्रयाजत्रयेपि प्रत्येकं तादृशहोमस्यांगत्वानुपपत्त्या प्रत्येकं चतुर्गृहीमाक्षिप्येतात्र्यथ चतुर्

९४ शपौर्णमास्यामङ्कुत्तयोरुत्पत्तेत्रमोदर्शमावास्यायामिति सामान्यतो निरूढमंजुहोतीत्यादि विशेषते
लिंगदर्शनेनोपांश्वाजप्रयाजानूयाजाज्यभागेषु होमप्राप्तिः चतुर्गृहीतंजुहोतीत्यनेन नतु प्राक्तनप्र
याजत्रये चतुर्गृहीतस्य त्वाज्ञस्यातिरिक्तेषु होमवत्सु चतुर्गृहीतं विधीयते प्राक्तनप्रयाजत्रयेतु चतुर्जुह्वां गृ
हीतं निप्रयाजेभ्यस्तदित्युत्सृष्टं भूतप्रयाजसाहित्यस्याविवक्षितत्वेन प्रतिप्रयाजे चतुर्गृहीतप्राप्त्याशंकाप्र
मपि जुहूकत्वादिकस्यैव चतुर्गृहीतस्य तंत्रेण लिंगदर्शनप्राप्तहोमसाधनता सिद्धेर्मतत्र चतुर्गृहीतंजु
होतीत्यस्य व्यापार इति । तदप्ययुक्तं । लिंगदर्शनमात्रस्य होमप्रापकत्वायोगात् । अत एव तत्र सप्तदशले
ध्यकारेणोक्तं । लिंगे मसाधकं प्राप्तिः स्यात्ताम् इति । न च सप्तमेस्त्वष्टाकपालमित्यत्र च लिंगदर्शन
दित्यत्र लिंगमात्रस्य प्रापकत्वमिवात्रापि तथास्यादिति वाच्यं । तत्रापि इतिकर्तव्यताकांक्षाभावनावि
धान्यथानुपपत्त्या सामान्यतोतिदेशकल्पनेनोक्तः शर्कराद्युत्पन्नार्थवादेनैव लिंगे विशेषमात्रावगमा
दिति अत्र ब्रूमः यजति चोदनाचोदितेषु द्रव्यकेषु उत्पत्तिरूपे आघाराद्यो होमप्राप्तेनारभ्यवादेन ९४

चतुर्गृहीतं जुहोतीत्यनेन चतुर्गृहीतमात्रविधिः सोऽप्युक्तरीत्या प्रयाजत्वव्यतिरिक्तेष्विति प्रत्युक्ता
स्त्वदापि कथं पासर्वेषु प्रदानाधिकरणेन चाचारादेव होमः प्राप्त इत्याशंक्य दूषितं नाचारस्य स्वतः प्राम
ण्याभावात् स्मृतिकल्पनस्य च प्रत्यक्षश्रुतिसद्भावेनुपपत्तेः। यद्याचारप्रमाणको होमः स्यात्तत्त
स्य प्रकृतिविकृतिसाधारण्यात् द्विकृतिष्वप्योपदेशिक एव होम इति प्रत्यक्षद्वारत्वादाहवनीयादयः
पवमाने स्युरित्यादिष्वपदेशादेव प्राप्येरन् प्रयश्च स्वकालत्वदिति न्यायात्। तत्र तासामग्निः प्रकृतितः प्र
याजवदिति सूत्रकारव्यवहारो नोपपद्येतेति। तदपि चतुरवत्तदानविषयमेव तत्रैव प्रत्यक्षश्रुत्योपस्तरणा
दिवाक्यप्राप्तचतुरवत्तानुवादेन होमविधिसंभवाद्वाघदूषणायातं। न च चतुर्गृहीतं जुहोतीत्यत्र तुनत
दापत्तिः चतुर्गृहीतत्वप्राप्त्यभावात्तदनुवादेन होमविधेरभवस्योक्तत्वात्। नापि द्वितीयदोषप्रसक्तिः
तासामग्निरिति सूत्रस्य चतुरवत्तहोममात्रविषयत्वे तथाप्युपपन्नेरिति इति श्रीमत्पदवाक्यप्रमाण
पारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते मीमां

९५ साद्यालघकाशे चतुर्थीयार्थसंग्रहः ॥ ॥ पंचमेऽप्रियमोन्यत्रेत्यधिकरणे शाखाभेदेनाम्नातानां प्र
याजाद्यनुमंत्रणानामेकोममैकाचलसेत्यादीनां वसंतमृजूनां त्वाणामात्यादीनां च समुच्चये सिद्धेक
लाकिंकश्चिन्नियतः क्रमोस्युतानियतइति चिंतितेतत्रशंक्यतेननुप्रघनुमंत्रणानामदृष्टार्थत्वं
95 तोमंत्राधिकरणविरोधः ॥ तथा क्रममद्वेदेशसामान्यादित्यत्र न चाविज्ञातलिंगानां प्रक्रियाविनिय
जिकात्वमसीत्यस्य च सामर्थ्ये संनिधावुपसंहृतमित्यनुमंत्रणदृष्टार्थत्वोक्त्याविरोधः ॥ तथा मंत्रसमुच्चाय
येनैवमंत्रार्थत्वेन संस्मरेतः शेषाणां तन्मना भूत्वस्यादितदनुमंत्रणमित्येवलक्षणानुमंत्रणत्वव्याघातः
अथदृष्टार्थत्वं ततः समुच्चयापाविक्रमचिंतानयुक्तेति ॥ अत्रोच्यते चित्तामंत्राणां स्मृतिरूपंदृष्टमेवप्रयो
जनं सैतात्र शास्त्रमंत्राणामिवास्मृतिस्तुस्तोत्रशास्त्रवद्दृष्टार्थो ॥ प्रयाजाद्यनुमंत्रणेषु चयद्यपिस्मृतिद्व
स्याक्रमेस्मृतिर्नभवतितथाप्यनुमंत्रणसमाख्ययातात्पर्यग्रहात्सावश्यप्राप्नुयेया ॥ याऽनुक्रमेश्चेत्यत्र
स्मृतेरेपिदृष्टार्थत्वात्तिः कृतयागस्यत्यवेरुणेनदृष्टार्थत्वादिति ग्रंथेसाभ्युपेत्यवादमात्रमिति ॥ तद ९५

युक्तं। तथा सति एवं विधादिस्मृतेरप्यदृष्टार्थतायां दर्शपूर्णप्रकरणग्रहणं संभवेत् तदनुमंत्राणां नामानुक्तौ प्रयोगात्।
अतो यत्र मंत्राणां लिंगात्कर्मसमवेतार्थप्रकाशकता तत्र स्मृतेरपि दृष्टार्थतैव। तद्विषयत्वादेव च प्रायिका-
नुमंत्रणालक्षणत्किंगामूलत्वात्। अतो न तद्दृशात्ययाजानुमंत्रणमंत्राणां न लक्षणयास्मृत्यर्थं तेतस्य दृष्टार्थ-
त्वमेवाकृतयोगेत्यादिवार्तिकं च स्मृत्यर्थानुमंत्रणविषयमेव नापुपेत्यवादः। तदर्थिमनमेवनुसत्यपि चादृ-
ष्टार्थत्व इति वार्तिकं नित्यानुवादद्रुति। पद्मामंत्रार्थत्वेनेति न मंत्रप्रतिपाद्यतये चेन प्रत्यर्थः करणमंत्रे प्रवृत्ति-
प्रसंगात्। किंतु प्रयोजनवचनोयमर्थप्रश्नः ततश्च न किंचिद् प्रतिपाद्यः किंचित्प्रतिपाद्यः शेषो मंत्रप्रयो-
जनत्वेन यत्र स्मर्यते तत्तदनुमंत्रणमित्यर्थः। एवं च मंत्रमुच्चारयन्निति शतृप्रत्ययो वर्तमानार्थः समर्थि-
तो भवति। मंत्रजन्यानुस्मृतिर्मंत्रपाठोत्तरकाले इति तत्र मंत्रमुच्चार्यानुस्मरेदित्यनुपपन्नं। तेन दृष्टार्थ-
स्याप्युपांशुपाठमंत्रणस्यादृष्टार्थस्यापि वप्रयाजाद्यनुमंत्रणस्य यानुकाले शेषानुसंधानाद्रुपरत्वादनु-
मंत्रेणतापियुक्ताऽत्र दृष्टार्थत्वात् समुच्चयोपपत्तिः। अजवस्तुकरणत्वाभावे सतीति विवक्षितत्वा-

९६ | 96

नकरणेऽप्यतिप्रसंगः॥ उच्चारणप्रचितिति च वर्तमानसामीप्ये वर्तमानवद्वेतिशता। मंत्रार्थवत्वेनेति मंत्रप्रति
पाद्यत्वेनेत्येवार्थः। ततश्च प्रयाजानुमंत्रणे चाप्यनुमंत्रणसमाख्यायेपदृष्टार्थत्वकल्पनेऽपि अग्न्यादान
मंत्रवद्ववनेसमुच्चयार्थमनिष्यतिकृत्वा चितावित्याहुः इति प्रयाजानुमंत्रणक्रमाधिकरणसमर्थनं। ष
ष्ठाध्यायेपस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति स त्रेधा तंडुलान् विभजेद्ये मध्यमाः स्युस्तानग्नये दा
त्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृ
ते चरुमित्यत्र प्रक्रांते दर्शकर्मणि देवतातद्गुणचरुत्वविधौ वाक्यभेदात् कर्मांतरमिति पूर्वपक्षयित्वा सि
द्धांतितं। मंत्रार्थवादादौ शिपिविष्टो विष्णुरित्यादिसामानाधिकरण्यादिशिष्टावगता देवतास्ति दात
प्रदातृशिपिविष्टशब्दानां च यौगिकत्वेनस्तुत्येवाग्न्यादिपदसामानाधिकरण्यात्पदद्वयप्रतिपादि
तं विशिष्टं देवताकारकमेकमेवाविधेयं अग्न्यस्तुद्येष्टि प्रकरणे च सहश्रपयतीति वचनमस्तीति तद्दे
तेकादाधिस्यविष्ट्योः स्थ्तारिण्योश्च सह पाकं विधत्तेति तस्मात्सर्वार्थशास्त्रं न कृत्वं दधिश्रृतपोश्चाधिक ९६

रणत्वमनूद्यते केवलं तु देवताकारकं विशिष्टं विधीयते प्रकृते दर्शे इति वाक्यभेदाभावान्न कर्मां-
तरविधिरिति। तदेतदाक्षिपति दाक्षिताः। दधिवाक्ये शृतवाक्येव प्रतिद्रव्यं देवतासंबंधबोधनाद्वाक्य-
भेदो दुःपरिहर इति कर्मांतरत्वं पूर्वपक्षे दोदुःपरिहरः। अंगकृतं च पक्षे एव वाक्यभेदप्रसंगपरिहाराय प्र-
कृतयागहानेन कर्मांतरविधिपरत्वं यथा यस्योभयहविरार्तिमार्छेदैंद्रं पंचशरावमोदनं निर्वपेदि-
त्यत्रौदनद्रव्यविधानात्पंचशरावपरिमाणविधानात्महेंद्रेण च सह विकल्प्यतः प्राप्तस्येंद्रस्य नित्य-
वद्विधानाद्वाक्यभेदाभियेव प्रकृत्य कर्म हानेन कर्मांतरस्य दोहार्तिविमित्तकस्य विधिः सिद्धांतितः
अन्यथा स्युदये वाक्यभेदं सोढ्वा देवतांतरमात्रविधिवत्प्रोभयमित्यत्राप्यार्तिदोह प्रति निश्चिविधि-
रिति पूर्वपक्ष एव परावर्तेतेति। तदेतदनति क्षुण्णमीमांसान्यायाना विमोषिकामात्रमेव। तथाहि
वाक्यभेदादपि चल्वदानर्थक्यमप्रमाण्यापत्तेः अत एव श्रुतादीनामप्यानर्थक्यप्रतिहतानां वि-
परीतं बलाबलमित्युक्तं। तदिह विध्यंतरैकवाक्यत्वाभावात्सहस्रपपत्तीति सहपाकविधिदम्म

दयश्राकस्य कर्मान्तरविधित्वे दध्यश्वरूत्तेवरूमित्यत एव सहपाकप्राप्तेनरनर्थकः स्यात्तान च श्राजाय-
तंघृतेच संमिश्रं पचेत्तत्सम्लमापुष्कामं इतिप्रधानविधौघृतस्यापयतीतिगुणविधिश्राज्यघृता
नुवादवत्कर्मान्तरत्वेप्यस्तु दध्यवाक्ये सहश्रपणविधिसिद्धच रूत्वानुवादस्यादिति वाच्यं। न यथाप्रा
प्तावन्नुनयथाप्राप्तौ वा संबंधविधिरिति हि जाद्यन्यधिकरणन्यायेनक्तं चर्वनुवादे च तद्द्वतासंबंधावि
धानेनाग्रामविधासिद्धेः। अतः सहपाकविधानार्थकपरिहाराय तद्बलेनैव तात्पर्यग्रहात्त्विर्वपेदि
त्यस्यानुषंगेणस्थविष्टृं दोदिहन्दधिश्रृतरूपद्वयचतुष्टयेपि देवताद्वयविधानार्थत्वात्तिद्वय्यं
वाक्यभेदमेवाभ्युपेत्यनप्रकृतकर्महानप्रकृतकर्मान्तरविधानं च युक्तं। तदुक्तं। गौणत्वं लक्षणा कं वा
पि वाक्यभेदेन वाक्यायां वेदाथमाश्रयत्यर्थं कोन्तुतं प्रतिकूलये यदिति। वाक्यभेदाभ्युपगमस्यैतत्तदी
र्तिकोक्तस्येदग्निधर्मेवोदाहरणं नान्यत्र गौणत्वोदाहरणं त्वनुपयाजैर्विवेद्युपेनोनिपत्यादन्त इति लक्षणो
दाहरणं तु मत्वर्थलक्षणो वा अर्त्तिचाकोतु सहपाकविधिवदा [illegible] सर्वग्राहकस्याभावात्।

कस्मेदपतिर्जिहीर्षेपाकर्मान्तरविधिरवन्याप्यइतिवैषम्यंइत्यप्युदितेषष्ठाधिकरणसमर्थनं घसप्त
वयधुइत्याजघन्यःस्यात्पुनर्यज्ञेसर्ववेदसंदद्याधथेलरास्मिन्नित्यधिकरणेउक्तंपौर्वापर्येपूर्वदौर्बल्ये
स्मिन्नेचिंत्यतेयदिप्रतिहर्त्रपच्छेदेजातेपश्चाद्उद्गात्रपच्छिद्यतेतदापुनर्यज्ञेसर्ववेदसंदेयमुतद्वादशश
तमिति।तदर्थंयद्युद्गाताच्छिन्नादक्षिणेनयज्ञःपरिसमाप्यतेइत्यदक्षिणताविधीयतेतन्नपूर्वलेवेति।तत्र
पक्षेपूर्वस्मिन्दास्यन्निति क्रतुस्वाभाव्याद्द्वादशशतवातदेयंप्रतीयतेनचतस्यप्रतिहर्त्रपच्छेदेद‍ति
मिन्नकसर्ववेदसेनवाधात्सर्ववेदसमेवदास्यन्नसात्पुद्गात्रपच्छेदेतदेवपुनःप्रयोगेदेयमिति
वाच्यंतस्याप्युद्गात्रपच्छेदेविहितेनादक्षिणेनवाधादितिप्राप्तेसिद्धांतस्तुनान्त्यादक्षिणाविह
धीयतेवाक्यभेदात्।किंतुपूर्वस्मिन्प्रयोगेदातव्यासतीदक्षिणाततउत्कृष्यान्तरप्रयोगेनिदि
प्यतेतेनादक्षिणोयज्ञइत्यनुवादः।पूर्वप्रयोगेचोद्गात्रपच्छेदेसतिद्वादशशतंवाधित्वासर्ववेद
समेवदातव्यमासीत्अतस्तदेयपुनःप्रयोगेदेयमिति।तत्रेदंनचिंतनीयंयदिप्रतिहर्त्रोजघन्यः

९८ स्यात् किं भवतीति तेनेदमवश्यं विचार्यं प्रतिहन्त्रेयच्छेदवत्प्रयोगे विहितेन सर्ववेदसेन पूर्वेज
दात्रपच्छेदेनेति मित्ते प्राप्ते नैमित्तिकं बाध्यमिति पौर्वापर्यन्यायेन स्यात्ते किं पुरः प्रयोगोपि बाध्य
ते उत नोत्कर्षे विधार्थसिद्धमदाक्षिण्यमात्रमिति तत्र विरोधनिमित्तको बाधः न च पुनः प्रयो
गांशेन सह विरोधोस्ति सर्ववेदसदानस्य किंतु दक्षिणोत्कर्षेणैव एवं प्रयोगादाक्षिण्यद्वारेणै
तावदेव बाध्यते उच्यते यथा घरेण एव सा स्मृताने विश्वजित्क्रीते विभागसंयोगादित्यधिकर
णे पदिसत्राय दाक्षितानां साप्तति संसे सोममभज्य विश्वजिता यजेतेत्युदाहृत्य किं
पं विश्वजित्क्रीतराजकस्यैवोत्यानत क्रीतराजकस्यापीति संशय्य तदर्थं च सोममभक्षयेतेज्ये
ति विधिरनुवादो वेति संशय्य विधिस्तत्र भवति द्विशिष्टैर्नैमित्तिकं क्रीतराजक एव च्या क्रोतिक
तुनाक्रीतराजक इति तस्य न विश्वजिदिति प्राप्ता प्राप्ते सोममभज्येत्यनुवादार्थसिद्धत्वात्सर्वा
र्थेह्यक्रीकृतधनानां सत्र त्यागे दक्षिणाद्व्यस्यैव सोमस्यापि भज्य ग्रहणं प्राप्तमेव। न विधिस्त ९८

98

तश्च विश्वजिन्मात्रं नैमित्तिकं। तच्च शक्यमेवाक्रीतराजकेन कर्तुमिति तस्याप्यधिकार इति सिद्धा वितं
॥ तच्चानुवादेन सिद्धांतकरणं व्यर्थमेव स्यादिति सेवंज्ञा यत्ते यच्च विशिष्टं नैमिकं तत्रापि विशेषणवाधे विशि
ष्टमेव वाध्यमिति। अतः प्रकृतेपि सर्वस्वदानेन पुनःप्रयोग विरोपणे एवं प्रयोगद्वेय दक्षिणादानेव
धिते एवमुत्पन्नं नैमित्तिकं तामं विशिष्टपुनःप्रयोग विषयं कृत्स्नमेव वाध्यते इत्येवन्याप्यं तेनायम
न्वाकार्थः। प्रस्तोतृप्रतिहर्त्रोपच्छेदे दानविकारमात्रं उद्गात्रपच्छेदे तु न परं स एव किं तु पुनःप्रयोगोपि
ति। ततश्चैतयोः पुनःप्रयोग इति गम्यते। अन्यथा यौगपद्येपि तत्र विप्रतिषेधाद्विकल्प इत्यधिक ९८
रणोक्तो विकल्पः स्यात् छिद्येत एवं पक्ष एव तु समुच्चयः स्थिरः स्यात्। तच्चापि हि विशेषणेनैव सह
सर्ववेदसस्य विरोधाद्विकल्पः स्यात्पुनःप्रयोगश्च स्याद्वा। अथ तत्र का दक्षिणेति चेत्। तत्रापौर्वा
पर्ये पुनःप्रयोगे का दक्षिणेति प्रतिप्रतिवंदसमुद्धर। अथ मुहदूत्वा एकसि ततः पूर्णा। द्वा
दशशतं पुनयत्रेति। यौर्वापर्येण पुनर्गपद्यापच्छेदे हि एवं प्रयोगे द्वादशशतं दास्यन्नासीदि

९९ त्तितदुत्कर्षविशिष्टः पुनः प्रयोगः स्यादेवाऽपूर्वप्रयोगे वोभयत्र सर्ववेदसदीयेतेति येन पक्षेऽपि समु

९९ च्चयपक्ष एव स्यान्न विकल्प इति तदधिकरणोच्छेदापत्तिः। तस्माद्विशेषपाठात्र बधं सर्ववेदसेन वस्तु

वेदसत्वेत्युपरम्यते इति प्रतिहर्तृजघन्यत्वे पुनः प्रयोगे बाधनिरूपणं अथेह कर्षयत्राद्ये प्रयो

गे केवलं मुद्गातापच्छिन्नस्तन्निमित्ते तु द्वितीयप्रयोगे केवलं प्रतिहर्तापच्छिन्नः। अत्राद्यप्रयोगगत्ता द

दशशतदक्षिणाः ज्ञात्वपच्छेदाद्वितीयप्रयोगे प्राप्नुयात्पूर्वस्मिन्नास्यादित्यादिति सा द्वितीयप्रयोगग

तप्रतिहर्त्रपच्छेदनिमित्तेन सर्ववेदसेन बाध्यते। ननु द्वितीयः प्रायश्चित्तरूपत्वेनाद्यप्रयोगांगभूतु

ज्ञाताजघन्यः स्यादित्यत्र चेदमुक्तं पूर्वप्रयोगांगभूते वदक्षिणान्तरप्रयोगे उत्कृष्यते न त्वाद्यप्रयोगे

आदक्षिण्यं विधीयते इति ततश्च द्वादशशतदक्षिणाद्यप्रयोगांगत्वात्रैमिकतदीयांगद्वितीयप्रयो

गांगभूतं प्रतिहर्त्रपच्छेदनिमित्तं सर्ववेदसमेव बाधेत अंगगुणविरोधन्यायादिति चेत्। न एव मुत्क

र्षविधेरदक्षिणत्वं प्रसज्येत। न सुत्तरप्रयोगगतयादक्षिण्यापूर्वप्रयोगोपयिकी आनतिः क्रियते। ९९

किंच पूर्वप्रयोगांगत्वेनैवावगतादक्षिणा ततश्चाछिद्रोत्तरप्रयोगांगत्वेनेह विधीयते अदक्षिणएतु
वाक्यशेषात्रिगिरा गिरेति वाक्यशेषेण वगिरापदस्थानापन्नेरिरा घदस्य । न चाछिद्रविधानं चतुर्थे नि
रस्तं पदातिष्यायां वर्हिरित्यादौ न । तत्र यातिष्याप्रकरणे प्रसन्नं वर्हिर्विहितं तत्स्वकरणं पाठे वै घर्थ्याप
त्तेराति ष्यांगमेवावधृपात तश्च तस्य निर्विषयतापत्तेः सार्वदिकमाछिद्रविधानं न युक्तमिति युक्त इह त्व
छिद्रविधानं घट एवं नैमित्तिकत्वात् । निमित्ताभावे वतस्यादक्षिणायाः पूर्वयोगांगत्वोपपन्नेरिति । कि
च द्वितीयप्रयोगांगकर्त्रानतिसिद्धार्थं यं दक्षिणा तत्प्रयोगांगमतैवेत्सुचितं नाद्यप्रयोगांगमतेति
आद्यप्रयोगांगकर्त्रानतिसिद्ध्यर्थत्वाभावात् । अन्यप्रयोगस्य हि चात्विजः संस्कारोतिअन्यप्रयोग
स्यवांगमितित्विएवं युक्तिः । ततश्च तद्दक्षिणालोपे प्रायश्चित्तमपि द्वितीयप्रयोगांगमेव नाद्यप्र
योगांगमिति तस्मादाद्यप्रयोगगतो ज्ञात्रपच्छेदनिमित्तके द्वितीयप्रयोगे उत्कृष्टद्वादशशतद
क्षिणा द्वितीयप्रयोगांगं प्रतिहर्त्रपच्छेदनिमित्तकसर्ववेदसदक्षिणावद्द्वितीयप्रयोगांगमेव नाद्य

१०० प्रयोगागमित्संमरणाविरोधन्यायाधीयपत्वान्न एवं वेदोत्तरया बाध्यते किंत्वनयोर्द्वितीययोर्वा पर्यन्या
येन एवं वैवेतरया बाध्यत इति सुस्थं इत्याद्यप्रयोगे केवलोङ्गान्तरपक्षे हि द्वितीयप्रयोगे केवलप्रतिह
100 र्येयपक्षे द्वैयोर्वा पर्यन्यायप्रवृत्तिनिरूपणं ॥ ॥इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीण
मीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते मीमांसाबालप्रकाशे षष्ठाध्यायार्थ
संग्रहः ॥ ॥अथ सप्तमे ष्टेतिदेशलक्षणं भाष्ये श्लोकमप्युदाहरंति प्रकृतात्कर्मणो यस्मात्तत्समानेषु
कर्मसु धर्मप्रदेशो येन स्यात्सोतिदेश इति स्थितिरिति । स पुनर्विभक्तो विभागे सप्तविधः प्रथमतो व
चनातिदेशो वचनातिदेशश्चेति द्विधा । तदुक्तं भाष्ये । स च नामप्रवचनेन चा तत्र नामा त्रिविधप्रतिदे
शोक्तं कर्मनामसंस्कारनाम यौगिकं चेति । एवं पुनर्द्विविधं प्रत्यक्षश्रुतमानुमानिकं चेति । आ
नुमानिकमपि त्रिविधं चोदनासामान्यातिदेशः प्रत्ययातिदेशः स्थानापन्नातिदेश इति । तत्र प्रथम
ष्यंत्योर्द्वौ भेदौ सप्तमेध्यायेनोक्तौ तथा चित्रयोराद्य इंद्रियकामाधिकरणे निरूपितः ॥ चुर्द्वौ वि परिवर्ते १००

मानस्याश्रयएवहितत्वस्येतिकर्तव्यतापात्राश्रयवदितिकल्पनयाप्रापकोभवतिनचोदनासामान्यं
स्थानापत्यतिदेशोपिफलचमसाधिकरणेनिरूपितः नचसोप्यमनुपपत्तातिचोदनासामान्यमिदम
तेश्रुतेरितिचोदनासामान्यमिदं ८ चंद्रेन्द्रियकामवाक्योज्जुहोतेरिवनारिष्टविसाधारणेनभक्ष
स्यापिद्वाद्वारिभक्षसाधारणेनचोदनालिंगत्वायोगातः॥अवःप्रकृतभक्षयोगात्सोमकार्यापत्तिःसो
मकार्यस्यचस्वोपकारपालिषवदिद्दग्नैर्विनानुपपत्तेराकांक्षयासोमवदितिकल्पनायायंचोदनासा
मान्यंतर्गतइतिसप्तविधत्वंसिद्धं॥अतश्चश्लोकेतत्समानेष्विताविवक्षितंचोदनासामान्यस्तनिमि
त्तातिदेशादेशव्यतिरिक्तेभेदषट्केअव्याप्तेःतथाकर्मस्वित्यप्यविवक्षितंफलचमसविषयेस्था
नापत्तिदेशभेदेअव्याप्तेः॥यद्वाफवचमसवद्दृष्टुन्मार्जनस्यापिविधेयत्वेनवाक्यभेदप्रसंगा
त्तदुभयविशिष्टमेवेष्टिंयजमानचमसाभ्यासयोगोत्तरमेवविधीयतइतिकर्मग्रहणेविवक्षि
तेपिनाव्याप्तिःतथापिखलेवालीएयोभवतीतिखलेवालीद्रव्यविषयस्यप्रशब्दरूपसंस्कारन

१०१

101

मातिदेशकर्मग्रहणं विवक्षायामव्याप्तिः स्यादेवेति तदविवक्षितमेवेति ॥ अथ मिश्राः षड्विध एवा
तिदेशः। यौगिकशब्देन हि केवलयौगिकं वा रूढं योगरूढं वा। तत्राद्यं विश्वजितिसर्वपृष्ठ इति वै
वनामगुणविधित्वात्तदुत्तरत्वमिहोच्चोद्भिदादिकमेनामशब्देनैवोक्तं। प्रायणीयेतु प्रथममयंत्यने
नेतिधैनैवयोगेनद्वादशाहे अवृत्तिस्तैनैवगवामयने पि तिसृष्विति हेतेर्नधर्मलक्षणं कमित्यन
तिदेशकमेव। नाप्यलतिदेशकोवतिदेशकनामसुस्पष्टातिदेशकशब्ददृति। वपंतु कर्मनामे
ति प्राप्तुक्तयोरूढमिति श्येनादि नहि तत्रापि रूढिरस्ति गुणविधेपवस्येवनिमित्तत्वात्सिहोमेण
वकइतिवत। नच योगः यौगिकमिति च योगरूढमिति भाष्यार्थेन कोपि दोषः। इतरकालु योगिकं न
तिदेशकमिति प्रायणीयादि केवलयौगिकपरं नाथ्यस्थयौगिकपदं ननवति किन्तु योगरूढपरमिति
वमाश्रयाः इत्यतिदेशलक्षणतद्भेदनिरूपणं ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधु १०१
रीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते मीमांसाबालप्रकाशे सप्तम

ध्यायार्थसंग्रहः॥ ॥अथ दशमेध्यायेयस्य लिंगमर्थसंयोगादित्येतत्तत्त्वार्थप्रपंचोर्थेष्वधिकरणेषु म
भाविधानिप्रकृतिलिंगासुक्तादिष्वपिश्रुतद्धितेन देवतानिर्देशात् एकद्विदेवतत्वमोषधद्व्यकत्वमा
ज्यद्व्यकत्वं पयोद्व्यकत्वं दधिद्व्यकत्वमुज्ज्वलविशदद्व्यकत्वं द्रवसमानवर्णद्व्यकत्वं पशु
ष्वनवगतिमद्द्व्यकत्वं निर्वपतिवत्वमालभतिकत्वं पशुषु प्राणिद्व्यकत्वं सुत्याकालत्वं प
शुगणत्वं इत्यादीनि। सोमेष्वव्यक्तचोदितत्वं अहर्गणत्वं अहीनत्वं सत्रत्वं संवत्सरसत्रत्वं निक
थित्वमित्यादीनि। तत्र यस्य लिंगमर्थसंयोगादिसामान्यतश्चेतौ स्वविशेषविवरणार्थेः स्व
तैरेतानि बद्धान्यपि कतिचिदन्यान्यपिचोदनालिंगामिसामान्यतः संगृहीतानीत्यन्यथानुपप
वकल्पनीयं यातेषाम् अपत्रार्थवशेन पादद्वयस्येत्यत्रार्थवशेनेति पादद्वयस्याहेत्वेतदस्यापि
हृत्वादिवशस्यापलक्षणार्थमित्युक्तं। कानि सामान्यानि चोदनालिंगानि तानि चैत्याज्ञच्यते। एकं ताव
दव्योदनालिंगाद्वयं देवतासंबंधप्रतिपादकतद्धितान्तपदात्तरसमर्पणाय यथाग्नेयेष्वमेकादशक

१०२ पालं निर्वपेत्सरस्वतीमाज्यस्य यजेत्बार्हस्पत्यश्चरुरिति। आग्नेयमेकादशकपालं चैन्द्राग्नमेकादशक
पालं निर्वपेदिति प्राकृते ऐन्द्राग्नेताभ्यामेत मग्नीषोमीयमेकादशकपालं पूर्णमासे प्रावच्छेदिति
विहिते प्राकृते ग्नीषोमीये चाविशिष्टमेवं द्विदेवतत्वं निर्वपति वत्वं च। यद्यपि द्वितीयं प्राकृताग्नीषो
मीयप्रधानचोदनायां नास्ति तथाप्यंगविधिनामिर्वापवत्वमस्त्येव। अतस्तत्र द्व्यदेवतासंबं
धप्रतिपादकतद्धितान्तपदे ग्निमुखत्वसाम्यमेव चोदनालिंगं प्राकृताग्नीषोमीयविध्यन्तातिदे
शनियामकं। तदेतच्चोदनालिंगमीमांसकानामप्यभिप्रेतं लक्ष्यते। अन्यथा द्वाम एव तृतीय
पादाद्ये हविर्गणे परमुत्तरस्येत्यधिकरणे आग्नावैष्णवे ग्नीषोमीयस्य विध्यन्त इति साध्ये द्दे
तासामान्यादिति हेतुरसंगतः स्यात्। द्विदेवत्यत्वस्यैन्द्राग्नेपि तुल्यत्वात्। एवमग्निसमवायमात्रस्या
पि तद्धितमात्रं त्वाग्नेयेपि तुल्यं तदभ्युपपंचार्थं तद्धितान्तपदवत्त्वमग्निमुखतद्धितान्तपदत्वव
वश्यं चिकृतित्वे वा अपेति। अवधारितांगविशिष्टस्यैवातिदेशात्। यया ग्नीषोमीयपशुपुरो १०२

किंचिच्चोदनालिंगांतरमिह सिद्धांतहेतुतया विवक्षितं गम्यते। एवमारंभणीयायामाग्नावैष्णव
मेकादशकपालं निर्वपेद्दर्शपूर्णमासावारप्स्यमान इति। आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षि
ष्यमाण इति च। द्यावापृथिव्यमेककपालमित्यत्र तु पंचादारतद्धितादेव चोदनालिंगादग्नीषोमीयवि
कृतित्वं। आश्विनद्विकपाले तु द्विदेवतात्वसत्वेऽप्यदारतद्धितवत्वादैंद्राग्नविकृतित्वं। एवं मारुतं स
प्तकपालं मरुद्भ्यः सांतपनेभ्यो मध्यंदिने स्वरूमित्यत्रापि सांतपनरूपविशेषणाधिक्येऽपि प्रधान
भूतदेवताविधि। अदारएवेति अदारदेवताविधिसादृश्यापादनेनकदेवतत्वाच्चैंद्राग्नविकृतित्व
मवासोपेंद्रवरुं निर्वपेच्छ्यामाकं सोमवामिन इत्यत्र तु अदारत्वे सत्यपि अर्थवादविशाद्गतसंख्या
याः प्रथमोपस्थितताया अपि बहिरंगत्वादंतरंगसोमरूपार्थसमवायेनेंद्रसमवायसाम्येऽपि वसो
मशाव्यात्तदुपस्थितो ग्नीषोमयविधं तएव। एवमिंद्रासोमीयेइंद्रमुख्यत्वादैंद्राग्नविकृतित्वं
सौम्यातैशस्य सोमारौद्रादौ तु सोमस्य समवायमात्रेणाग्नीषोमीयविकृतित्वं मुख्यत्वात एंद्राग्नवि

कृतित्वं॥ सोमापौष्णस्यापारौद्रादेस्तु समस्तसमवायप्रात्रैगाग्नीषोमीयविकृतित्वं। एवमैन्द्रासो
१०३ मीयैन्द्रमुख्यत्वत एन्द्राग्नविकृतित्वं। शुनासीरीयैन्द्रौ वैश्वदेवमित्येतच्च सैत्पष्णग्नाग्नीषोमीयचो
दनालिंगे पंचावदानत्वे तत्संख्याया बहिर्गतत्वादेतत्रगे इन्द्रसमवायेनैन्द्राग्नविकृतित्वं। एवमैन्द्रापौ
103 ष्णैन्द्राबार्हस्पत्यादौ। एवमैन्द्रः पुरोडाशः सौम्यश्चरुरित्यत्रेन्द्रसमवायेनैन्द्राग्नविकृतिः। पूर्वं तु चरुस्तु सौ
मसमवायेनाग्नीषोमीयविकृतिः। वैश्वदेवं चरुं निर्वपेदित्यत्र व्यवानिल्पादौ तु चतुरवत्तेन किंचिन्न
वदानं वावदानत्वादिनियामकमस्तीत्यनियमः। ऐन्द्राग्नाग्नीषोमीयविकृतित्वे। तदिदमुक्तं भावपत्ते
वसूचेत्येकदेवता आग्नेयविकारा द्विदेवता अग्नीषोमविकारा बहुदेवता ऐन्द्राग्नविकारा वेति
अन्ये ऐन्द्राग्नविकारा वेति द्विदेवतेष्वपि संबंधनीयं। तेनोभयत्र विकल्पः। स च व्यवस्थितो समुद्रः क्रो
दाहरणेषु पूर्वोक्तरीत्या क्वचिच्चाव्यवस्थितविकल्पोपातिः कपर्दी तु पांसां चिकृतीनां द्विबहु
देवतापदेषु चतार्पदहराण्यधिकारानिवानाग्नीषोमीयविकारायासंतुच्चाएनानिवातान्ऐन्द्रा १०३

विकारात्अन्यत्रप्रकृतिदेवतास्यादित्याहतत्रबद्धत्वेणसामीप्यात्अदूरोपस्थितावपिषडहादि

त्रिम्बुसामीप्यात्तंवादूरोपस्थितावपिचतुरहदेउभयसामीप्यात्कथंपंचादशरस्यैवोपस्थितिरितिवि

त्वं।यस्यानुक्रमेणःकश्चिदुत्पत्तिचोदनायांकेनचित्प्रकृतिलिंगेनकिंचिद्विकृतित्वमवधारितं

तस्यकर्मणोन्यत्रातिदिष्टस्याहेनान्यदेवतात्वेपिनतद्धनुकंकर्मान्तरविकृतित्वंभवतिएवंचावधा

रितकर्मविकृतित्वंवाऽपैति।अवधारितंणविशिष्टस्यैवातिदेशात्पशावग्नीषोमीययपशुपुरोडाशस्याग्नी

षोमीयस्यवपयाप्रचर्याग्नीषोमीयंपशुपुरोडाशमनुनिर्वपतीत्यग्नीषोमीयपशुप्रकरणोत्पन्नस्या

ग्नीषोमीयमितिप्रकृतिलिंगसंयोगेनदार्शपौर्णमासिकाग्नीषोमीयपुरोडाशविकृतित्वेनावधारितस्या

ग्नेयेसवनीयेऐन्द्राग्नेचनिरूप्यमाणेवतिदिष्टस्याहेनाग्नेयत्वेऐन्द्राग्नत्वेचसत्यपितत्रप्रत्यक्षचोदनाभा

वेनचोदनालिंगासंभवात्प्रकृतस्यैवपशुपुरोडाशस्यप्रकृतावग्नीषोमीयमितिचोदनालिंगेना

वधारितंदार्शपौर्णमासिकाग्नीषोमीयपुरोडाशविकृतित्वंनबाध्यतइतितदापमेवानुमंत्रणादिमप

१०४ स्यतोर्धृतं स्वाम्यादेः सवनीये आग्नेयस्य पशुपुरोडाशस्याग्नेयविकृतित्वनिरूढे चैन्द्राग्नस्य पशुपुरोडाश
स्यैन्द्राग्नविकृतित्वमित्याविधानमुपेक्ष्यमेवायन्तु तन्मकृमापस्त्वेवसर्वं तदप्यंगं वासमभिव्याहारादिति
वन्नुतितदनुसारिन्यायविरोधाद्धाप्यं। अतएवकात्यायनेनैतदनुमन्यतइति इत्याहुर्मिकप्रकृतिलिंगा
भेदप्रपंचनिरूपणं पार्वणहोमयोस्तत्प्रवृत्तिरितिविशेषातिदेशापवादः फलत्वियमकंत्तसमुदायव
दृष्टमएवचक्रत्वोपिकथवित्सर्वसंगोत्रवमउक्तः प्रमेयत्वाहुर्मिकमितिहिवतत्र किंचित्तिं स्वैतास्तुवेण
पार्वेशोत्स्तुहोतितीसंख्यापाकमर्मनेदादोपर्वदेवश्चौहोमोविधीयेतेतत्रपर्वशब्दः स्मार्तेदानकर्मणोः
ष्यन्नः कर्मवचनस्तेनकर्मैवदेवतासाव्रस्मरणीयत्वेनसंस्कार्यातत्रयथैकैकेहोमः षट्कर्मदेवत्याः स्याद्
तोऽविद्यमानकर्मांशेऽहरर्थतापद्येतनत्वारिहारायएकः पौर्णमासीदेवत्योपरोमावास्यादेवत्यइतिकल्प
तेतेनप्रकरणविशेषेपिसत्त्वपाकन्यायेनसंस्कार्यवशाद्व्यवस्थासौर्यादौचसंस्कार्यस्यसत्त्वात्यस्याभाव १०४
दनतिदेशइत्यधिकरणार्थः। तत्रकात्यायनोज्येतिपूर्वपक्षेनिरस्तेयिस्वरूपकांतरंप्रति[illegible]ति। पौर्णमा

स्यमावास्याशब्दयोः पौर्णमास्यधिकरणे समुदायनामत्वनिरासेन यागनामत्वमुक्तं तद्वदत्रापि शब्दोपि न स
मुदायवाची किंतु यागवाची एतावतैवानार्थान्निष्पन्नत्वात्। एवं त्येकः शब्दो याज्ञातात्वाग्नेय्यादियागत्र
१०५ यसंस्कारेपि प्रत्येकधर्मत्वात्प्रत्येकविकृतौ सौर्यादावतिदेशः स्यादेवेति। अत्रोच्यते। विधिमात्रप्र
माणिकादेवतेत्युक्तमिंद्रमहेंद्राधिकरणे विधिशब्दस्य मंत्रत्वे भावः स्यादिति देशमेवाश्रुतः पार्वणा
105 विति तद्धितो देवताविधित्वावदवश्यं वाच्यः तस्य वस्तुसंस्कार्यसमर्पकत्वे वैरूप्यलक्षणवाक्यभेदयातैः
सदेवताविधिरेव। एवं देवतायाश्च होमस्य पर्वस्मारणसामर्थ्याल्लिंगाद्वाक्याच्च पर्वप्रतितादर्थ्यं पदां १०५
तरकल्पनया भवति सामर्थ्याच्च वाक्ये श्रुतिकल्पकत्वात्। यादृशानां च क्रमेण विधेयविशेषणविवक्षाप
परस्परसहितानां देवतात्वमवगतं तादृशानामेव भाव्यत्वं भवति न प्रत्येकमिति प्रत्येकविकृतावनतिदे
शः। न चैकस्यैव वस्तुस उपादेयत्वादृशायां विवक्षितमेकत्वं स्वर्गकाम इति पदांतरेणोद्देशदशायां त्वविवक्षि
तमित्युक्तं वर्णानामप्युपादेयदशायां विवक्षितसाहित्यं पदांतरेणोद्देशदशायां त्वविवक्षितं स्यादिति चेत्।

